श्रीरुक्मिणीमतिमुषं पुरुषं परं तं वन्दे दुरन्तचरितं हृदि सच्चरन्तम्॥
वन्दे प्रतिघ्नन्तमघानि शङ्करं घनां स मे मूर्द्धि दिवानिशं करं॥
शिवाच्च विघ्नेशमथो पितामहं सरस्वतीमाशु भजेऽपि तन्मयम्॥
श्रीलक्ष्मीं गरुडं सहस्रशिरसं प्रद्युम्नमीशं कपिं
श्रीसूर्यं विधुभौमबिद्धुरुकविच्छायासुतान् षण्मुखं।
इन्द्राद्यान् विबुधान् गुरुंश्च जनकौ तातं तन्मातामहं
नत्वार्यान् वितनोमि माधवमुखान् धर्माब्धिसारं मितं॥
दृष्ट्वा पूर्वनिबन्धान्निर्णयसिन्धुक्रमेण सिद्धार्थान्।
प्रायेण मूलवचनान्युद्धृत्य लिखामि बालबोधाय॥
तच्च कालः षड्विधः। वत्सरः, अयनं, ऋतुः, मासः, पक्षः, दिवस इति।

End. मूलभूतानि पद्यानि विकृतानि क्वचित् क्वचित्।
निर्विकाराण्यपि नवान्यपुक्तान्यच कानिचित्॥
मीमांसाधर्मशास्त्रज्ञः सुधियोऽनलसा बुधाः।
कृतकार्याः प्राङ्निबन्धैस्तदर्थं नायमुद्यमः॥
य पुनर्मन्दमतयोऽलसा यज्ञाश्च निर्णयम्।
धर्मं वेदितुमिच्छन्ति रचितस्तदपेक्षया॥
निबन्धोऽयं धर्मसिन्धुसारनामा सुबोधनः।
अमुना प्रीयतां श्रीमद्विट्ठलो भक्तवत्सलः॥
प्रेम्णा सद्भिर्ग्रन्थः सेव्यः ग्रब्दार्थतः सदोषोऽपि।
संशोध्य(?) वापि हरिणा सुदामसुनिसतुषण्मुष्टिरिव॥
श्रीकाश्यपाभ्यायवरो महात्मा बभूव विद्वद्द्विजराजराजः।

तस्मादुपाध्यायकुलावतंसो यज्ञेश्वरोऽनल्प दृमावभूतां ॥
यज्ञेश्वरो यज्ञविधानदक्षो देवज्ञवेदाङ्गसुशास्त्रशिक्षः ।
भक्तोत्तमोऽनल्पगुणैकधामानल्पाक्षयोऽनल्पकलावतारः ॥
एषोऽत्यजज्जन्मभुवं स्वकीयां तां कौङ्कणाख्यां सुविरक्तशाली ।
श्रीपाण्डरङ्गे वसतिं विधाय भीमातटे मुक्तिमगात्सुभक्त्या ॥
तस्यानल्पाभिधानस्योपाध्यायस्य सुतः क्रतौ ।
काशीनाथाभिधो धर्मसिन्धुसारं समातनोत् ॥

Colophon. श्रीमत्काश्युपाध्यायरुरिरुद्भुतयज्ञेश्वरोपाध्यायानुजानल्लोपाध्यायरुरिसुतकाशीनाथोपाध्यायविरचिते धर्मसिन्धुसारे तृतीयपरिच्छेदोत्तरार्द्धं समाप्तम् ॥

विषयः। १ परिच्छेदे, काल-सङ्क्रान्ति-व्रत-तिथीष्टि-याग-श्राद्ध-ग्रहणादिनिर्णयः। २, तृतीयाचतुर्थ्यादितिथिव्रतविशेषमन्वादि-दशावतारजयन्ती-दमनोत्सव-चैत्रवैशाखादिद्वादशमासकृत्य-प्रकीर्णकनिर्णयः। ३, पूर्वार्द्धे, गर्भाधानाद्युद्वाहान्तसंस्कारदन्तधावनस्नानहोमादिनित्यकृत्य-स्थालीपाक-बलिवैश्वदेवादि-वापीकूपतडागाद्युत्सर्ग-मालासंस्कार-स्थिरदेवप्रतिष्ठादि-राजाभिषेक-याचा-गोचरफलाद्भुतशान्त्यादिनिर्णयः। ४ उत्तरार्द्धे, जीवत्पितृकर्त्तव्यकर्म-श्राद्धाधिकारिश्राद्धकाल-श्राद्धपद्धति-सूतकान्त्येष्टि-प्रायश्चित्त-सन्यासग्रहणादिनिर्णयः ॥

No. 774. प्रयोगरत्नीयचरकसौत्रामणी, वा बोधायनचरकसौत्रामणी।

Substance, country paper, 10 × 4¾ inches. Folia, 3. Lines, 16 on a page. Extent, 150 ślokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Prayogaratnίya-charaka-sautrámaṇi alias *Bodháyana-charakasautrámaṇi*. This is a chapter of a comprehensive work called *Prayogaratna*, or a manual for the performance of religious rites. The chapter under notice treats of the ceremony named *Sautrámaṇi*, in which the principal offering is a spirituous liquor made from rice, *i. e.*, a kind of arrack. By S'eshanáráyaṇa. The author follows the rules of Bodháyana.

Beginning. सौत्रामणीं व्याख्यास्यामः। पूर्वेद्युर्नान्दीश्राद्धाद्यपरेद्युः स्नानादिनिवृत्तमित्यन्ते चरकसौत्रामण्या यजे इत्युपक्रमात्।

End. इति पूर्णाहुतिं हुत्वा समारोप्यायतने मथित्वा विच्छृत्य मनस्वतीं हुत्वा सायमग्निहोत्रं जुहोति। सन्तिष्ठते सौत्रामणी।

Colophon. इति श्रीम॰ श्रेषनारायणोक्ते प्रयोगरत्ने चतुर्थः।
इति बोधायनचरकसौचामणौ समाप्ता ॥

विषयः। सौचामणीष्टिप्रयोगः ॥

No. 775. अग्निप्रयोगः।

Substance, country paper, 10½ × 4½ inches. Folia, 29. Lines, 11 on a page. Extent, 750 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Agniprayoga. A manual for the performance of the Agnishṭoma rite, according to the rules of Bodháyana. Anonymous.

Beginning. बोधायनं नमस्कृत्य व्याख्यातृंश्च पुरातनान्।
अग्निप्रयोगं वक्ष्यामि विष्णुदत्तान्वयोऽग्निचित् ॥
उक्तः सर्वप्रकृतिभूतो ज्योतिष्टोमोऽग्निष्टोमः। अथेदानीं सर्वप्रकृतिविकृति-साधारणमग्निष्टोमेन सह व्याख्यातुमारभते।

End. (खण्डितत्वाच्छेषव्याख्यादिकं नास्ति)।

विषयः। अग्निष्टोमप्रयोगः ॥

No. 776. रसहेमः, वा कङ्कालीरसहेमः।

Substance, country paper, 12 × 5 inches. Folia, 16. Lines, 20 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Rasahema alias *Kaṅkálírasahema.* A pharmacopœia of mercurial and other metallic preparations. The MS. is incomplete. It gives receipts for upwards of two hundred kinds of metallic compounds.

Beginning. श्रीभैरवं प्रणम्यादौ सर्वज्ञं त्रिजगत्प्रभुम्।
श्रीभारतीञ्च विघ्नेशं वन्दे प्रत्यूहशान्तये ॥
अथ ध्यायन् समायातः श्रीकङ्कालीययोगिनः।
हविष्यान्नं भवि स्वापं हविष्यस्यापि भोजनम् ॥

क्रियाभ्रष्टे न सिध्यन्ति तपोनिष्ठे फलन्ति हि ।
स्खलद्दोषांस्ततः शुद्धिं संस्कारान् प्राग् वदाम्यहम् ॥

End. (खण्डितत्वात्परिसमाप्तिवाक्यादि नास्ति ।)

विषयः। पारदलौहादिद्रव्यद्वारा नानाविधरसायनौषधनिर्माणप्रकारः।

No. 777. उपग्रन्थसूत्रम् ।

Substance, country paper, 10½ × 4 inches. Folia, 36. Lines, 7—8 on a page. Extent, 1600 slokas. Character, Nágara. Date, Sm. 1642. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Incorrect.

Upagrantha Sútra. A sútra work treating of expiations and details in connexion with various Kalpa rites.

Beginning. अथ सम्पत्सिद्धिरनादेशे लोचीयातः श्रते विशेषसङ्ग्रासमस्त्राख्ये प्रत्येकमर्च्चा-द्विनियमो ज्योतिष्टोमेन वतमुक्थे चिपच्चाशे—इत्यादि(?) ।

End. पुरीषपदशेषाणि निधानान्याचार्याः खरितान्तानि यथाधीतं वा तेषु रीपाश्च विध्यशेद्वोधिकारादागन्तोवागतः(?) ॥ १२ ॥

Colophon. इत्युपग्रन्थसूत्रे चतुर्थः प्रपाठकः । इत्युपग्रन्थसूत्रं समाप्तम् ॥

विषयः। १ प्रपाठके, गायत्र्यादिच्छन्दःकथनं, यज्ञत्रुटिनिमित्तकप्रायश्चित्तोक्तिः; सचाय दीक्षितेन कर्त्तव्यादि च । २, अक्रीतसोमापहरणप्रायश्चित्तं, सोमकलशे भग्ने प्रायश्चित्तादि, सोमे दग्धे प्रायश्चित्तं, श्रष्टानुकल्पादि च । ३, वैश्यवर्णकल्पोक्तिः प्रवर्ग्यभंसये कर्त्तव्यम्, एकाहलोचाणि, षड्हछत्यं, द्वादशाह-श्रहश्रथन्तरश्रष्ठ-लोचीयादिकथनं, गानेचरश्रद्धिर्लोपश्च तन्न्यायसमुद्देशव्याख्यादि । ४, प्रति-हारोदाहरणकथनादि ॥

No. 778. उत्सर्गमयूखः ।

Substance, country paper, 10 × 5 inches. Folia, 26. Lines, 8—9 on a page. Extent, 520 slokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

First page of a MS. of the Upagrantha Sūtras
dated Samvat 1642 = A.D. 1586.

ॐ नमः
१ श्रीगणेशाय नमः॥ अथ सप्तत्रिंशिका नाम शास्त्रोत्पत्तिः॥ अथ सप्तत्रिंशिका नाम शास्त्रं कस्मात् प्रोच्यते विशेषसप्तसप्तत्यपत्यैकसप्तर्क्षदिनियमाज्ज्योतिष्प्रमनवतमुख्यविपञ्चाशद्धाचत्वारिंशन्निचत्वार्यतिरात्रसवनानां तन्त्रिवादशं दस्तत्तन्मन्त्रस्थानदेवतेयन्तिसप्तवतुरुत्तरासप्तितिगायत्रीजगत्यैहृत्पद्मसिवकुरोवहृत्पद्मनुष्टुभोसेवसप्तमीयैकैरुत्थद्वंदोनिरितिषष्टित्रिष्टुन्नस्तासाग्निहित्रयेविंशतितिगायत्र्यश्चपंचचत्वारिंशतांबृहत्यावादशकुनथतस्तिगायत्रीनिस्ताबृहत्पस्तान्सप्तपंचाशत्तत्पङ्क्तिरातितिगायत्र्यस्तस्तात्रिष्टुन्नस्तिस्रश्चैशनपुरोजित्यंदशपद्या १

Utsarga Mayúkha. Directions for consecrating tanks, wells, &c., and purifying them should they happen to be polluted by the death of a monkey, or a cat, or by other cause. By Nílakaṇṭha Bhaṭṭa. *Vide* No. 761 for another work of this author.

Beginning. उक्त्वा दानविधिन्नाम राममाराध्य भास्करं ।
उत्सर्गविषये भट्टनीलकण्ठो वदत्यथ ॥ तत्र जलाशयोत्सर्गप्रशंसा विष्णुधर्मोत्तरे ।

End. ततोऽभिषेकग्रहपूजाग्निपूजाविसर्जनश्राद्धानमण्डपायुपस्करप्रतिपत्तिविप्रभोजनभूयसीदानकर्मेश्वरार्पणानि जलाशयोत्सर्गवत् ॥

Colophon. इति श्रीमीमांसकभट्टनीलकण्ठकृते भास्करे जलाशयारामोत्सर्गमयूखः ।
इति उत्सर्गमयूखः समाप्तः ॥

विषयः । वापीकूपतडागायुत्सर्गस्य विधिः प्रयोगश्च, वाप्यादिषु मार्जारवानरादिमृतकाद्युपघाते तत्प्रायश्चित्तकथनं च ।

No. 779. मोमहणविलासः, व्याख्यासहितः ।

Substance, country paper, 9¾ × 5¼ inches. Folia, 160. Lines, 9—10 on a page. Extent, 8000 slokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Momahaṇavilása. A treatise on the diseases peculiar to women and children, and on aphrodisiacs. By Momahaṇa, son of Prayágadása, a Kshatríya of Kálpi. The work was completed on Saturday, the 4th of the month of Chaitra, 1468, during the reign of Muhammad Sháh, son of Firuz Sháh.

Beginning. यं स्मृत्वा ललितां प्रजापतिरिमां सृष्टिं व्यधान्मानवीं
श्रीकण्ठस्खलिघकान्यदनुजश्रेणीं जघान द्रुतम् ।
चक्रे रणमरुद्दृढा सुरहा चक्रे च्युतस्वस्त्ययं (?)
तं प्रत्यूहनिघातये गणपतिं वन्देऽहमिष्टप्रदं ॥
यत्कर्मातालपवनादुद्धता(?) वारिराशयः सप्त ।
एकीयन्ति युगान्ते तमहं वन्दे गणेशानं ॥
स्वान्वये वीरलगोचजन्मा प्रख्यातकीर्त्तिः किल वाघलाख्यः ।
आसीद्यदाख्यां बिभराम्बभूवुस्तद्वंशजाः सन्ति हि वाघलाख्याः ॥
यद्वंशजानां भूत्यर्थं बभूव कुलदेवताः ।

मरोट्टवासिनी देवी सर्वदुर्हन्निकृन्तनी ॥
तस्य कुलेऽतिथिभक्तः प्रसिद्धनामा बभूव हरिवाधलः ।
यस्य दानस्य तुलायां लघुतां भजतीह कर्णदानमपि ॥
तस्यात्मजोऽभूद्भिरामकान्तिः प्रयागदासो गुणवान् वदान्यः ॥
विरुदावली यस्य बभूव मच्छां मर्यादमेरुर्महिमसमुद्रः ।
तदङ्गजो मोमहणः प्रसिद्धो गुरुद्विजन्मातिथिदेवभक्तः ॥
बभूव यस्यार्थिजनाः प्रशंसां कुर्वन्ति सर्वत्र च बङ्गप्रदस्य ।
मोमहणः कुतुकादिह मोमहणविलासनामानं ।
सकलजनहृदयङ्गापितं(?) चकार सद्योगसङ्गृहं रम्यम् ॥

End. अब्दे नागरसम्मतीन्दुरचिते १४६८ पक्षेऽसिते चैचके
हेरम्बस्य तिथौ विकर्त्तनसुतस्याङ्गि न्यलोक(?) वै प्रजानां पतेः ।
ग्रन्थे मोमहणो व्यधाद्भुजजनुः सद्योगचूड़ामणिं
ग्रन्थं सङ्गिषजां मतानि च बहून्यालोक्य वैद्यागमान् ॥
कालिन्द्या रुचिरे सुदक्षिणतटे सद्बलविद्युद्युता
नाम्नाभूत् किल कालपीतिनगरी ख्याता धरामण्डले ।
तस्यां कालपिदैवतं निवसति प्रायः स्वयं सर्वदा
लोकानामभिलाषदं सुरजनैः संसेवितं सत्प्रभं ॥
भूपालो महमूदसाहिरभवत्तीरोजाधानात्मजः
सार्द्धं योद्धुमलं न हिन्दुकजनास्तेनाभवन् सङ्गरे ।
तस्योर्जित्करिदृन्दहृंहितमिहाश्वानाञ्च श्रेषारवं
श्रुत्वा यान्त्यरयो ध्रुवं जलनिधेः पारस्य तीरे ध्रुवं ॥

Colophon. इति कालपीग्रामवस्तव्यचचियप्रयागदासात्मजमोमहणविरचिते महमूदसाहिराज्ये मोमहणविलासनामग्रन्थः समाप्तः ।

विषयः । १ प्रथमे अधिकारे, शुक्रदृष्टिकरौषधादिकथनं । २, शुक्रस्तम्भकौषधकथनं । ३, लिङ्गदृष्टिदार्ढ्यकथनं, स्त्रीकुचनितम्बदृष्टिकथनञ्च । ४, लिङ्गस्तब्धकारकौषधकथनं । ५, षण्ढत्वनाशकौषधकथनं । ६, बन्ध्यात्वनाशकौषधकथनं, गर्भरक्षार्थं मन्त्रौषधप्रयोगः, भगसङ्कोचविधिः, स्त्रीरोगचिकित्सादि च । ७, बालरोगचिकित्सोपयोग्यौषधमन्त्राकिकथनं । ८, बालग्रहचिकित्साप्रकारः । ९, १०, डाकिनीचिकित्सादिप्रकारः । ११, बालग्रहादिनिवारणार्थं कतिपयमन्त्रोक्तिः, माहेश्वरादिधूपनिर्माणविधिश्च ॥

No. 780. कात्यायनसूत्रपद्धतिः ।

Substance, country paper, 12 × 4¾ inches. Folia, 55. Lines, 14 on a page. Extent, 3000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Kátyáyana-Sútra-Paddhati. A guide to the performance of the ceremonies described in the Kalpa Sútra of Kátyáyana. By Devayájñika, son of Prajápati. The MS. is incomplete and contains only the first portion of the work. The first two folia are wanting.

Beginning. (प्रथमतः पचद्दयं खण्डितं) ।

End. प्रातर्होमस्तु स्वकाल एव । अत ऊर्द्धं सन्ध्यातर्पणवैश्वदेवादिनित्यक्रियायामधिकारः । नातः प्राग् भवतीति शिवम् ।

Colophon. इति श्रीचिरग्निचिन्महायाज्ञिकश्रीप्रजापतिसुतश्रीदेवयाज्ञिककृतायां कात्यायनसूत्रपद्धतावग्नेयोमः समाप्तः ।

विषयः । दीक्षितकर्त्तव्येष्टिः, अवभृथपर्यन्तदीक्षितनियमाः, महावीरसम्भरणं, प्रायणीयेष्टिः, आतिथ्येष्टिः, प्रवर्ग्यचरणं, प्रैषमन्त्रविशेषाः, अध्वर्योर्गोदोहनार्थं, गमनादि, प्रवर्ग्यकरणं घर्महोमः, उपसदिष्टिः, प्रवर्ग्यशान्तिः हविर्धाननिष्पादनं, उपरवखननं, सदःकरणं, सदोमानादि, अग्निस्थाननिष्पादनं, आग्नीध्रीयादिस्थानकरणं, अग्नीषोमीयेष्टिः, अभिषवेष्टिः, प्रातःसवनं, माध्यन्दिनसवनं, तृतीयसवनं, अवभृथेष्टिः, उदयनीयेष्टिः, अनुबन्ध्येष्टिः, पयस्येष्टिः, इत्यादीनां विवरणम् ॥

No. 781. अनुमानमणिदीधितिव्याख्या, शिरोमणिमूलसहिता ।

Substance, country paper, 13 × 5¼ inches; some of the leaves are yellow. Folia, 460. Lines, 12-14 on a page. Extent, 18,130 s'lokas. Character, Nágara. Date, Sm. 1828. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Anumána-maṇi-didhiti-vyákhyá. A commentary on Raghunátha S'iromaṇi's *Anumána-maṇi-didhiti.* By Bhavánanda Síddhántavágís'a. *Vide* ante I, p. 285.

Beginning. श्रीगोविन्दपदाम्भोजनखचन्द्रमरीचयः ।
सच्चरिष्णोस्तमस्यन्धे मम सन्त्ववलम्बनम् ॥
नमस्कृत्य गुरून् सर्वान् निगूढं मणिदीधितौ ।
श्रीभवानन्दसिद्धान्तवागीशेन प्रकाश्यते ॥

शिरोम०प्रा० ॐ नमः सर्वभूतानि विष्टभ्यपरितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥ १ ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणां ।
दीधितिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥

मू०प्रा० प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बह्वादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते ॥

End. नीलविशिष्टे धूमेऽपि विशेषणतोपाधेः सत्त्वेन निरुपाधित्वं साधनव्यापकत्वादिति विशेषणतायाटस्य(?) प्रामाणिकत्वान्नदपेक्षितं भट्टाचार्यशिरोमणिभिरिति ।

Colophon. इति श्रीमच्चामहोपाध्यायसिद्धान्तवागीशभवानन्दविरचितानुमानमणिदीधिति-व्याख्या समाप्तिं पफाण ।

शि० स० तथापि जन्यत्वमरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न तच बकल्पभावसम्भव इत्यच तात्पर्यम् ।
इति श्रीमन्भट्टाभट्टोपाध्यायशिरोमणिकृतानुमानमणिदीधितिः सम्पूर्णा ।

मू० स० एकदृत्तित्वात् अवच्छेदेन दृत्तिरचापि तुल्या तच देशभेदेनाच समयभेद इति ॥

विषयः । अनुमानमणिदीधितिव्याख्यानम् ।

No. 782. राक्षसकाव्यं, सटीकं ।

Substance, country paper, 9¼ × 4¼ inches. Folia, 6. Lines, 13—14 on a page. Extent, 175 s'lokas. Character, Nágara, Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct,

Rákshasa-kávya. A poem of 20 stanzas in which a forester describes various pastoral objects for the gratification of his mistress. By Vararuchi Kavindra. The author is said to be the same person who formed one of the "nine jewels" of Vikramáditya. The MS. is in the *trivallí* form, and has a running commentary on the text.

Beginning. टीका० कश्चिदित्यनिर्दिष्टनामा पुरुषः इमां वक्ष्यमाणां गां वाचं वनितां बभाष उक्तवान्। किं कुर्वन् वनं काननं विचरन्। इत्यादि।

मूल० कश्चिदनं बह्ववनं विचरन् वयस्थो वशां वनात्मवदानां वनितां वनार्द्राम्। इत्यादि।

End. टीका०। उत्तमवच उक्तं कथमपि लां भूयः किं छला दिनं दिवसं तया प्रियया सह रमित्वा, कथम्भूतः अभीक्ष्णः पुष्टाङ्ग इत्यर्थः। इति पादपूरणे ॥ २० ॥

Colophon. इति श्रीवरुचिकवीन्द्रेण विरचितेन(?) राक्षसकाव्यं समाप्तं। शुभं। टीका समाप्ता।

मू० एतावदुत्तमवचः सुमनाः स उक्ता रन्त्वादिनं सह तया प्रियया ह्यभीक्ष्णम्। युक्तश्चतुर्भिरनडुद्भिरदीनवद्भिरारुह्य यानमथ सम्प्रययौ खगेन्द्रे ॥ २० ॥

टीका० इति श्रीवरुचिकवीन्द्रेण कृतं राक्षसकाव्यं समाप्तम्।

विषयः। कश्चिद्वयस्थो वनस्थः पुरुषो विचरन् वनजान् वृक्षादीन् प्रदर्शयन् तद्दर्शनं वनितां श्रावयति।

No. 783. यज्ञप्रायश्चित्तविवरणं।

Substance, country paper, 9¼ × 4 inches. Folia, 42. Lines, 13 on a page. Extent, 1250 slokas. Character, Nágara. Date, Sm. 1783. Place of deposit, Calcutta, Government of India. Appearance, old. Prose, Generally correct.

Yajñapráyas'chitta vivaraṇa. A treatise on expiations for flaws in the performance of the Darsa, Paurṇamása and other ceremonies. By Gopála. The MS. comprises three Prasnas, the first having 11, the 2nd 10, and the 3rd 8 chapters; but from the style of its commencement and end, it would seem that this is only a part of a larger work. Contents: I. 1, General expiations necessary where no special expiation has been ordained. 2, Expiation for not using the ordained number of pots. 3, Expiation for breakage of the wood used in producing fire by friction. 4, Expiation for defects in Agnihotras, &c. 5—6, Expiations for defilement of the wood for producing fire. 7—11, Expiations for defilement of oblatory articles; do. for suspicion of such defilement or for their use irregularly; and for their being spoiled in cooking.—II. 1, Expiation for rites performed by a consumptive person. 2, Expiation for absence from home for more than a year. 3, Expiation for defects in the Purodás'a for the Nakshatra ishṭi. 4, Expiation for

substitutes. 5, Expiations for animals intended for sacrifice. 6, Expiation for Cháturmásyá vrata, or the quadrimensial fast. 7, Expiation for defects in the initiation of the Adhvaryu. 8, Expiation for accidents in cooking offerings. 9. Expiation for defects in the use of mantras. 10, Optional courses. III. 1, Expiation for accidents to the cooking pot. 2, Expiation for irregularities in the actions of the priests. 4, Expiation for accidental omission of oblations. 5, Expiation for accidental blowing out of the fire when produced by friction. 6, Expiation for use of ordinary fire in rites. 7, Expiation for omission of particular rites. 8, Duties of persons who have established the sacred fire, when they are about to start on a journey.

Beginning. अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः । उक्तानि दर्शपूर्णमासादीनि कर्माण्यनन्तरं तेषामकरणेऽन्यथाकरणे प्रायश्चित्तानि व्याख्यास्यामः ।

End. एवं हि श्रूयते, मलवद्वासमानसंवदेत न सहासीत नास्या अन्नमद्यादित्यारभ्याभ्यञ्जनप्रभृतिगृह्यकाममन्यदित्युक्तम् । अन्यत्सहासनादिति भवस्वामिना व्याख्यातम् ।

Colophon. इति श्रीगोपालकृते यज्ञप्रायश्चित्तविवरणे हतीयप्रश्नस्याष्टमोऽध्यायः ।
त्रुटितोऽयं ग्रन्थः । खण्डः २ (आदर्शे लिखितमित्थम्)

विषयः । १ प्रश्ने ।—१ अध्याये, अनुक्तप्रायश्चित्तस्यलकर्त्तव्यसाधारणप्रायश्चित्तं । २, कपालविधिन्यूनाधिक्ये प्रायश्चित्तानि । ३, अरणिभङ्गादिप्रायश्चित्तं । ४, अग्निहोत्रादिप्रायश्चित्तं । ५, ६, अरण्यमेध्यस्यार्शप्रायश्चित्तं । ७, ८ हविषि दुष्टे प्रायश्चित्तं । ९, हविर्दोषशङ्कायां हविर्द्रव्यहोमव्यतिक्रमे च प्रायश्चित्तं । १०, सान्नाय्यप्रायश्चित्तं । ११, हविर्विक्रत्यादिप्रायश्चित्तम् ।

२ प्रश्ने ।—१ अध्याये, ज्वररोगग्रस्तान्यदारासक्ताहिताग्निकर्त्तव्यप्रायश्चित्तं । २, संवत्सरातिरिक्तप्रवासे प्रायश्चित्तं । ३, पुरोडाशभेदेन क्षता आयुष्मत्या नक्षत्रेष्टयः । ४, आश्रयणानुकल्पहरितयवादिद्रव्यकथनं । ५, पशुप्रायश्चित्तं । ६ चातुर्मास्यव्रतानि । ७, अध्वरदीक्षानियमभङ्गप्रायश्चित्तकथनं । ८, सर्वयज्ञानां स्खलनभिन्नदुष्टादिगुणविशिष्टहविःप्रायश्चित्तं । ९, मन्त्रहीनादिप्रायश्चित्तं । १०, विहितकालद्रव्याद्यनुकल्पकथनं ।

३ प्रश्ने ।—१ अध्याये, हविर्धानीभग्नादिप्रायश्चित्तं । २, होत्रमैत्रावरुणादीनां स्वस्वकर्त्तव्यकर्मव्यतिक्रमे प्रायश्चित्तं । ३, सोमाऽऽहुतिविस्मृतिप्रायश्चित्तं । ४, क्रताऽक्रतसोमसंसर्गप्रायश्चित्तं । ५, अरणिसमारूढाग्निनाशप्रायश्चित्तं । ६, लौकिकाग्निहोत्रविधिः । ७, अग्निहोत्रकालेऽग्निहोत्रक्रियाऽकरणे प्रायश्चित्तं । ८, आहिताग्नेः प्रवासे कर्त्तव्यम् ।

No. 784. प्रश्नवैष्णवः ।

Substance, country paper, 9½ × 4¼ inches. Folia, 24. Lines, 9 on a page. Extent, 480 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, nearly new. Verse, Generally correct.

Prasnavaishṇava. Astrological questions and answers founded on the Váráhi Saṁhitá, the Tájika and other standard works. By Náráyaṇa Gosáiñ Nṛipatí. The MS. is imperfect.

Beginning. नारायणं परमपूरुषमादिदेवं ज्योतिर्मयं शुभकरञ्च चराचरेशम् ।
शान्तं प्रणम्य शिरसा द्विजपुङ्गवानां प्रश्नार्णवस्य वमहं प्रकरोमि शास्त्रम् ॥ १ ॥
श्रीब्रह्मदासनयजातनयः सुविद्वान् श्रीमान् गुसांयिनृपतिर्यदुनाथभक्तः ।
वाराहनाजिकमुकुन्दमतं समीक्ष्य नारायणः परमशास्त्रमिदं चकार ॥ २ ॥
प्रष्टा प्रणम्य हरिमिन्द्रकुपुस्तुखस्थो ज्योतिर्विदं सकलशास्त्रकलाविदग्धं ।
आकृष्य सद्भुवि चितं फलपुष्परत्नहस्तः प्रसन्नवदनः सकृदेव पृच्छेत् ॥ ३ ॥
लग्ने चरे च हृतलाभ ऋणास्यदार्थनाशे गदक्षयगमागमबन्धमोक्षाः ।
प्रष्टुर्भवन्ति परचक्रमुपैति शीघ्रं रोगी च जीवति कलिः शमते नु भूयः ॥ ४ ॥

End. (खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति) ।

विषये। १ अध्याये, प्रश्नकालीनलग्नादिभावस्थितरव्यादिग्रहद्वारा शुभाशुभकार्यसिद्धिकथनं । २, धनलाभ-राज्यलाभ-नृपमन्त्रिस्नेह-राज्यचलाचल-नृपदर्शनादिप्रश्नफलकथनं । ३, ४, जयपराजयप्रश्नफलकथनं । ५, ग्रहवधादिज्ञानार्थं सदृष्टचक्रकथनं । ६, राज्यभंगकरनिमित्तकथनादि । परचक्रागमनादिप्रश्नफलम् ।

(२४ पत्रेषु एते विषयाः सन्ति । इतः परं खण्डितत्वात् परग्रन्थविषया न प्राप्तः ।)

No. 785. भास्वती, टीकासहिता ।

Substance, country paper, 11¾ × 6 inches. Folia, 64. Lines, 11 on a page. Extent, 1920 s'lokas. Character, Nágara, badly written. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Incorrect.

Bhásvatí. A treatise on astronomy and astrology. By Satánanda, son of S'aṅkara by Sarasvatí. Attached to the work is a com-

mentary entitled *Bálabodhiní* by Balabhadra, son of Vasanta, and grandson of Vimalákara of the Kaus'ika gotra. The text was written in the S'aka year 1021, = A. D. 1099 and the commentary was completed on Thursday, the 2nd of the wane in the month of Chaitra, Samvat year of Vikramaditya, 1465, = A. D. 1521, in the town of Umá, in the country of Jámila, during the reign of the Sháhi dynasty.

Beginning. टीका प्रा० । आदिमध्यान्तशून्याय विधाविग्रहधारिणे ।
महर्षादिस्वरूपाय नित्याय हरये नमः ॥ १ ॥
आसीद् द्विजन्मा विमलाकराख्यः ख्यातः सुशीलो द्विजदेवभक्तः ।
तस्यात्मजः श्रीहरिपादभक्तो नित्यं हराराधनसक्तचित्तः ॥ २ ॥
विस्फन्नभज्ञः श्रीमान् दैवज्ञः श्रीवसन्त इति नामा ।
शास्त्रार्थविद्गुणवान् गुरुपादार्चने सदा निरतः ॥ ३ ॥
बलभद्रस्तस्य सुता हरिगुरुचरणारविन्दकृतसेवः ।
कुरुते गुणोपयुक्तां सङ्क्षिप्तां भास्वतीं टीकां ॥ ४ ॥
इह तावद् ग्रन्थारम्भे निर्विघ्नपरिसमाप्तिमुद्दिश्य खेष्टदेवतानमस्कारपूर्वकं मङ्गलाचरणमात्मनामकथनमङ्कपिण्डानयनञ्च श्लोकेनैकेनाह । तत्रेति ।

मूलप्रा० नत्वा मुरारेश्चरणारविन्दं श्रीमाञ्छतानन्द इति प्रसिद्धः ।
तां भास्वतीं शिष्यहितार्थमाह शाके विहीने शशिपक्षखेकैः ॥ १ ॥

End. टीका स० । श्रीमान् शतानन्दनामा गणितसिद्धान्तवित् सरस्वतीशङ्करयोस्तनूजः । सरस्वती मातुर्नाम, शङ्करः पितुर्नाम, तयोस्तनूजः पुत्रः, इमां भास्वतीं कृतवान् ।
व्याख्यायां यन्मयात्युक्तं यच्च युक्तिविवर्जितं ।
भ्रान्त्या वा लिखितं यच्च तत्कार्यं शम्यतां बुधैः ॥

Colophon. इति बलभद्रविरचितायां प्रतिलेखाधिकारोऽष्टमः ।
रसवह्नितिथौ शाके मार्गशीर्षमासे शुक्लेऽष्टम्यां सोमवासरेण ।
लिखितं बलभद्रेण—
शररसमनुमितशाके चैत्रे शुक्लेतरद्वितीयायां ।
गुरुवासरे सम्पूर्णा कृतवान् बलभद्रकेण सा टीका ॥
खरशशिशक्रसमेते शाकेऽचातोऽचनाकुले जन्म(?) ।
वसुयुगवर्षेण मया रचिता बालावबोधिनी विमला ॥
श्रीविक्रमादित्यशाके १४९५ चैत्रमासस्य कृष्णद्वितीयायां तिथौ जीववासर श्रीमद्राजाधिराजश्रीमानसाहिभुज्यमाने श्रीमज्जुमिलादेशे उमासञ्ज्ञकनगरे

श्रीमत्सकलविद्याविशारदकौशिकान्वयजन्मादैवज्ञसत्यात्मजो वल्लभद्रनामा ज्योतिर्विन्नेन इमां बालबोधिनीं भास्वतीटीकां कृतवान्।

इति श्रीसत्यात्मजवल्लभद्रदैवज्ञविरचितायां भास्वतीटीकायां परिलेखाधिकारोऽष्टमः समाप्तः ॥

मूलम्० खखाश्विवेदाब्दगते युगाब्दे दिशोन्नितः श्रीपुरुषोत्तमस्य।
श्रीमान् शतानन्द इतीदमाह सरस्वतीमङ्करयोसनूजः ॥ १० ॥

विषयः। १ अधिकार तिथिध्रुवानयनं। २, ग्रहध्रुवानयनं। ३, तिथिनक्षत्रानयनं। ४, ग्रहस्फुटकरणं। ५, प्रश्नफलकथनं। ६, ७, ग्रहणविवरणं। ८, स्पर्शमोक्षसमयनिर्द्धारणादि।

No. 786. पदगाढः।

Substance, country paper, 8½ × 3½ inches. Folia, 74. Lines, 7 on a page. Extent, 740 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, nearly new. Prose. Generally correct.

Padagádha. Vedic measures. Anonymous.

Beginning. इदानीं सर्वसामानि। अग्निर्तोजा अङ्गिरा नीवया गभीरवेपा इहच्छ्रवा नोधादमूना नवेदा अद्वया दीर्घतमाः शुधुपाजा ऋमणा ऋतमाः सुमना विमनाः सुवासा ऋग्रग्रा नग्रा उषाः पत्या भोजा ऋभुक्षाश्चन्द्रमा अप्सराः सजोषा जातवेदा इति सर्वत्र विसर्जनीयाः।

End. राजन् राष्ट्रञ्च राज्ञिश्च राधो रायरथर्यसि ॥
ररानि रपसो राज्ञो रभखद्रखभखान्।
रसररावाय रराव्णे रवथेन ररपांसि च ॥ रथो सप्तविंशतिः।

Colophon. इति पदगाढः समाप्तः।

विषयः। सर्वसमान-सर्वर्चवाच्यानाम्नां कथनं, द्विसङ्ख्यादिपञ्चाशत्सङ्ख्यान्वितनामवाच्यानाम्नां कथनं, पूर्वापराख्यनामवाच्यानाम्नां कथनं, अखण्डितनामवाच्यानाम्नां कथनं, खण्डितनामवाच्यानाम्नां कथनं, द्वैपदनामवाच्यानाम्नां कथनं, पदच्छेदप्रकारदर्शनं, अथशब्दवतीनां सप्ताशीत्यृचां कथनञ्च।

No. 787. दैवज्ञचिन्तामणिः ।

Substance, country paper; $7\frac{3}{4} \times 4\frac{3}{4}$ inches. Folia, 63. Lines, 11—12 on a page. Extent, 950 s'lokas. Character, Nágara. Date, SM. 1870. Place of deposit, Calcutta, Government of India. Appearance, nearly new. Verse. Generally correct.

Daivajña chintámani. A treatise on judicial astrology. By Yasodhara, son of Kañsárí Mis'ra. The MS. is incomplete.

Beginning. अथान्यं सम्प्रवक्ष्यामि फलं योगसमुद्भवं ।
मासवारतिथीनाञ्च सम्यग् ज्ञानप्रकाशकं ॥ १ ॥
प्रतिपदि रविवारे चैत्रमासे यदि स्यात्
न भवति बहुदृष्टिर्दुःखिता लोकसङ्घाः ।
अयुतकिरणवारे ऋक्षभुजिद्वाक्पतीनां
भवति न तु धरित्री शस्यतोयाभिपूर्णा ॥ २ ॥

End. यदा च जायते पक्षक्षयोदर्शदिनात्मकः ।
तदा लोकातिघोराः स्यान्मण्डला च × मेदिनी (?) ॥ ५८ ॥

Colophon. इति श्रीकंसारिमिश्रात्मजमिश्रयशोधरविरचिते दैवज्ञचिन्तामणौ सामान्यग्रह-कथनो नाम प्रकाशस्यतुर्दशः ॥ १४ ॥

विषयः । १ प्रकाशे, वैशाखादिद्वादशमासानां तिथिविशेषेषु वारनक्षत्रादिविशेषयोगे दृष्ट्यादियोगे च वा सति दुर्भिक्ष-राजविद्रोह-प्रजासुखदुःख-मारीभय-शस्य-महर्घ्यसमहर्घ्यतादिविविधशुभाशुभफलकथनं । २, प्रभवादिषष्टिसंवत्सरशुभा-शुभफलं । ३, तत्तन्नक्षत्रविशेषकथनं । ४, रव्यादिग्रहाणां स्वभावादिवर्णनं । ५, नक्षत्रादिविशेषगतस्य सूर्यस्य तात्कालिकादिवर्णदर्शने शुभाशुभफलं । ६, नक्षत्रराशिविशेषगतस्य वैवर्ण्यादिमतश्च चन्द्रस्य शुभाशुभफलं । ७, नक्षत्र-विशेषराशिविशेषगतस्य किंशुकादिवर्णान्तरं गतस्य भौमस्य शुभाशुभफलं । ८, नक्षत्रविशेषराशिविशेषगतस्य आश्विनादिमासदृष्टस्य बुधस्य शुभाशुभफलं । ९, नक्षत्रविशेषराशिविशेषगतस्य गुरोः शुभाशुभफलं । १०, नक्षत्रराशिविशेष-गतस्य ग्रहविशेषादियुक्तस्य शुक्रस्य शुभाशुभफलं । ११, नक्षत्रराशिविशेष-गतस्य शनैश्चरस्य शुभाशुभफलं । १२, राशिविशेषादिगतस्य राहोः शुभा-शुभफलं । १३, नक्षत्रविशेषदिग्विशेषगतस्य केतोः शुभाशुभफलं । १४, सूर्यादिग्रहाणां दिव्यायगादिजनितशुभाशुभफलकथनं ।

No. 788. जानक्यानन्दबोधनं ।

Substance, country paper, 10 × 3¾ inches. Folia, 264. Lines, 7 on a page. Extent, 2544 slokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Jánakyánanda-bodhana. A poem in twenty cantos, in which the river Ganges appears in human form before Sitá, during her exile in the hermitage of Válmíki, and consoles her by religious advice. By S'rípatigovinda.

Beginning. (प्रथमतः ५२ पद्यानि न सन्ति ।)

End. यथाज्ञानं मया चित्ते जानकीजगदीप्सितुः ।
कृतं तेन सदा रामः प्रसन्नोऽस्तु गुरुर्मम ॥ ७१ ॥
यदस्मिन् सौष्ठवं भाति तद्गुरोरेव मे न हि ।
यच्च निन्द्यं भवेदत्र तन्ममैव गुरोर्न हि ॥ ७२ ॥
इति गोविन्दसङ्गीते जानक्यानन्दबोधने ।
लयाख्यो विंशतितमस्तरङ्गो रङ्गदायकः ॥ ७४ ॥

Colophon. इति श्रीपतिगोविन्दविरचिते जानक्यानन्दबोधने भागीरथीजानकीसंवादे विंशतितमस्तरङ्गः ।

विषयः । अस्मिन् ग्रन्थे वाल्मीक्याश्रमे परित्यक्तया जानक्या सह मूर्त्तिमत्या गङ्गायाः प्रबोधवाक्योक्तिः । अत्र २० तरङ्गाः सन्ति । तत्र ५२ पद्यानां खण्डितत्वात्तरङ्गचयस्य विषयो न प्राप्तः । ४, तरङ्गे, आत्मानात्मादिकतिपयपदार्थनिर्णयं वेदान्तमतेन नैयायिकं बोधयन् कथयति । ५, श्रुतिस्मृतिपुराणादिवाक्योपन्यासेन ज्ञानस्यैव मोक्षकारणत्वोपपादनं । ६, वेदपुराणादिवाक्यैर्नारायणस्यैव मोक्षकारणत्वोपपादनं । ७, वेदपुराणादिवाक्यैर्हरस्य हर्यभिन्नत्वस्य जगत्कारणत्वादेश्च प्रतिपादनं । ८, मनोलयप्रकारथनं । ९, बन्धमोक्षकारणकथनादि । १०, अहन्नोत्पत्तिनिरासकवाक्योक्तिः । ११, पञ्चवटीवृत्तान्तकथनादि । १२, सीतारामयोः पूर्वकृतरहस्यरासलीलाकथनं । १३, रामस्य सखीगणपरिवृतया सीतया जलकेलिकथनादि । १४, १५, १६. नानाविधशान्तिवाक्यैर्जानक्याः पुनः प्रबोधनादि । १७, वासनाभ्रासप्रकारकथनादि । १८, सर्वत्र रामभावनाकथनादि । १९, रामस्य सर्वात्मकादिवर्णनं । २०, परमात्मभावनादिकथनञ्च ।

No. 789. काव्यकामधेनुः ।

Substance, country paper, 10¼ × 4½ inches. Folia, 30. Lines, 14 on a page. Extent, 1200 slokas. Character, Nágara. Date, Sm. 1671. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Kávyakámadhenu. This work has already been noticed in the first volume, (No. 358,) but the MS. examined for that notice having been very defective, the initial and the final words there given, are not correct. The following supplies many details about the work and its author.

Beginning. येनाऽविद्यद्विकरणैराख्यातैर्धातुलोहितैः ।

प्रकाशैः सम्प्रकाशन्ते क्रियास्तन्त्रैमि गोपितम् ॥ १ ॥

कविकल्पद्रुमं धातुपाठं विरचितुं निजं ।

धातुवृत्तिः काव्यकामधेनुर्नाम विधीयते ॥ २ ॥

तत्र प्रयोगा धातूनामित्क्रमादिस्फलाचिताः (?) ।

शब्दिपोस्खलितां तुल्यप्रयोगाणां सभेदकाः ॥ ३ ॥

तत्रादौ ग्रन्थकर्तुश्चिन्तेष्टदेवतामादित्यमुपास्ते ।———

शब्दाकरकरग्राममर्थमण्डलमण्डलं ।

ज्ञानतत्त्वाजमनघन्नमादित्यं तमुपास्महे ॥

तमिति, तच्छब्दः प्रतिसमाधिसमयसङ्कुचसमर्थकलेनानुभूतस्य स्वरूपस्य प्रतिपादनायच्छब्दं नापेक्षते । यथा, सेयं ममाङ्केषु सुधारसच्छटेत्यादौ । अथ पूर्वाचार्यान् जयवादेन विनेति ।

इन्द्रचन्द्रः काशकृत्स्नापिशली शाकटायनः ।

पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥

अथ ग्रन्थस्वरूपं निरूपयति ।

मतानि तेषामालोच्य सर्वसाधारणैः स्फुटः ।

धातुपाठस्वराद्याद्यक्रमादन्तादिमक्रमः ॥

कविकल्पद्रुमो नाम पद्यैर्निर्ण्यायते (मया) ।

End. धातूना (धातूना) मिह सौचाणां द्विचत्वारिंशदीरिताः ।

धातुभिर्दीर्घोपसंहरति ।

इति स्फीतः सम्प्रदायस्य षट्कोनषष्ट्या ।

धातुस्तम्भैर्युधाः सेव्यः कविकल्पद्रुमः फलन् ॥

सप्तदशगणानां समाहारः सप्तदशगणी, षट्कोनषष्ट्याधिका षट्कोनषष्टा तया ।
धातव एव स्कन्धास्तैः । फलानि प्रतिस्कन्धं प्रयोगरूपाणि फलानि सं(सं)पश्यन् ॥

अथ ग्रन्थकर्त्तात्मानं व्याख्यापयति ।——

विद्वज्जनेशश्रिष्येण भिषक्केश्वरसूनुना ।
तेने वेदपदस्थेन बोपदेवद्विजेन यः ।

यः कविकल्पद्रुमो बोपदेवद्विजेन तेने व्यस्तारि स मेय इति पूर्वेणान्वयः ।

सम्पादयन्मीमङ्कादौ कार्त्तस्वरलसन्निधिं ॥
अथध्वं विबुधाः कामकामधेनुमनन्दिताः ॥ १ ॥
व्युत्पादयन्तु शब्दज्ञास्तैस्तैश्चैवदाहृतीः ।
सर्वधाकरणार्हायां नास्यां तान्येलिखं ह्यहं ॥ २ ॥
य एनामविदित्वेच्छेत्कर्त्तुं धात्वर्थनिर्णयम् ।
स वै मूढो विदां मध्ये ह्युपहासमवाप्नुयात् ॥ ३ ॥

Colophon. इति श्रीपण्डितबोपदेवविरचिता काव्यकामधेनुर्नाम धातुवृत्तिः समाप्ता ।
स्वर्गे गीर्वाणनार्यः सुरपतिमभितः शाब्दिकानां वरेण्यं
पातालेऽप्येवमेवं भुजगयुवतयो यस्य गायन्ति कीर्त्तिं ।
यस्तीर्णः शास्त्रपाथोनिधिमखिलमिमं मेप्यदं वा सुराद्रेः
श्रिष्णोऽकार्षीद्विनेशः कविकुलतिलकः कैश्चिदेवं बोपदेवः ॥
गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलसारभक्षितम् ॥
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम् ॥

विषयः । इकाराद्यनुबन्धद्वारा सेड्वेणनेड्धातुनिर्देशः । अकारादिहकारपर्यन्तवर्णान्तविन्यासक्रमेण दशगणिधातूनां कथनं, सौत्रधातुकथनञ्च । (कविकल्पद्रुमनाम्नो धातुपाठग्रन्थस्य वृत्तिः काव्यकामधेनुनाम्नी । उभयोः कर्त्ता बोपदेव एव । ग्रन्थशेषे सर्वधातुपरिगणना च कृतास्ति ।)

No. 790. भार्ङ्गधरसंहिता ।

Substance, country paper, 12 × 5½ inches. Folia, 96. Lines, 13 on a page. Extent, 2170 slokas. Character, Nágara. Date, Sm. 1725. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Śárṅgadhara Saṁhitá. Materia Medica and pharmacopœia in three parts. By Śárṅgadhara, son of Dámodara. Contents: Part I, Chapter 1, Weights and measures. 2, Dissertation on physicians. 3, Pulse, dreams, character of messengers who are to go for physicians; effects of particular omens when proceeding to treat a case. 4, Infusions and decoctions. 5, Nerves, arteries, veins, &c. 6, Alimentation; treatment of infants; humours of the body. 7, Nosology and enumeration of diseases. Part II. 8, Extracts, decoctions, levigates, &c. 9, Certain extracts recommended for particular diseases. 10, Churning of infusions. 11, Cooling applications. 12, Levigation. 13, Powders. 14, Pills, boluses and conserves. 15, Electuaries. 16, Pomades or medicines boiled in ghi. 17, Medicated oils. 18, Asavárishṭa medicines. 19, Preparation of oxides and metallic compounds. 20, Mercurials. Part III. 21, Uses of oils, ghi, fat and marrow. 22, Fomentations, 23, Emetics. 24, Purgation. 25, 26—27, Injections, 28, Snuffs. 29, Fumigation. 30, Gargles. 31, Plasters. 32, Bleeding, 33, Collyrium, &c.

Beginning. श्रियं सदाङ्गवतां पुरारिर्यदङ्गतेजःप्रसरे भवानी।
विराजते निर्मलचन्द्रिकायां महौषधीव ज्वलिता हिमाद्रौ ॥ १ ॥
प्रसिद्धयोगा मुनिभिः प्रयुक्ताश्चिकित्सकेर्यैः बहुशोऽनुभूताः।
विधीयते शार्ङ्गधरेण तेषां सत्सङ्ग्रहः सज्जनरञ्जनाय ॥ २ ॥
हेलादिरूपात्मकजातिभेदैः * * समीक्ष्यातुरसर्वरोगान्।
चिकित्सितं कर्म न दूषणाढ्यं कुर्वीत वैद्यो विधिवत् सुयोगैः ॥ ३ ॥
दिव्यौषधीनां बहवः प्रभेदा इन्द्रारकाणामिव विस्फुरन्ति।
ज्ञात्वेति सन्देहमपास्य धीरैः सम्भावनीया चिविधप्रभावाः ॥ ४ ॥
स्वाभाविकागन्तुककायिकान्तरा रोगा भवेयुः किल कर्मदोषजाः।
तच्छेदनार्थं दुरितापहारिणः श्रेयोमयान् योगवरान् नियोजयेत् ॥ ५ ॥
प्रयोगानागमात् सिद्धान् प्रत्यक्षादनुमानतः।
सर्वलोकहितार्थाय वक्ष्याम्यनतिविस्तरात् ॥ ६ ॥

अथानुक्रमणिका।——

प्रथमं परिभाषा स्याद्वैद्यज्ञाख्यानकं तथा।
नाडीपरीक्षादिविधिस्ततो दीपनपाचनं ॥ ७ ॥
ततः कलादिकाख्यानमाहारादिगतिस्तथा।
रोगाणां गणना चैव पूर्वखण्डोऽयमीरितः ॥ ८ ॥

स्वरसः क्वाथफाण्टौ च चिमः कल्कश्च चूर्णकम् ।
तथैव गुटिकालेहौ स्नेहः संधानमेव च ॥ ९ ॥
धातुस्तुडी रसाश्चैव खण्डोऽयं मध्यमः स्मृतः ।
स्नेहपानं स्वेदविधिर्वमनञ्च विरेचनं ॥ १० ॥
ततस्तु स्नेहवास्तः स्यात् ततश्चापि निरूहनं ।
ततश्चाप्युत्तरो वास्तिस्ततो नस्यविधिर्मतः ॥ ११ ॥
धूमपानविधिश्चैव गण्डूषादिविधिस्तथा ।
* * दीनां विधिः ख्यातस्तथा शोणितविश्रुतिः ॥ १२ ॥
नेत्रकर्मप्रकारश्च खण्डः स्यादुत्तरत्रयम् ।
द्वाविंशत्यभिताध्यायैर्युक्तोयं संहिता स्मृता ॥ १३ ॥
षड्विंशतिशतान्यत्र श्लोकानां गणितानि च ॥

End. आयुर्वेदसमुद्रस्य गूढार्थपदसंश्रयम् ।
ज्ञातः कैश्चिद्बुधैस्तैस्तु कृता विविधसंहिताः ॥
कश्चिदर्थं ततो नीला कृतेयं संहिता मया ।
कृपाकटाक्षविक्षेपमस्यां कुर्वन्तु साधवः ॥
विविध * या * * दरिद्रनाशनं हरिरमणीव करोति योगरत्नैः ।
विलसतु शार्ङ्गधरस्य संहिता (क)विहृदयेषु सरोजनिर्मलेषु ॥

Colophon. इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने नेत्राञ्जनविधिर्नाम चतुस्त्रिंशत्तमोऽध्यायः । समाप्तोऽयं ग्रन्थः ।

विषयः । पूर्वखण्डे ।—१ अध्याये, मानपटलादिमानकथनं । २, भेषज्यकालगुणवीर्यादिकथनं । ३, नाडीपरीक्षा । स्वप्नदर्शनप्रतीकारः । वैद्याकारकदूतलक्षणादि । रोगिचिकित्सार्थं गमनकालीनशकुनस्य शुभाशुभफलम् । ४, दीपनपाचनादिगुणोक्तिः । ५, शरीरस्यस्नायुमज्जानाड्यस्थ्यादिसङ्ख्यास्वरूपादिकथनं । विश्वसृष्टिकथनम् । ६, आहारपाकप्रकारः । गर्भोत्पत्तिप्रकारः । कुमारपोषणप्रकारः । नरस्य वातपित्तादिप्रकृतिज्ञानकथनम् । ७, रोगगणना ।
२ खण्डे ।—८, स्वरसकल्ककाथादिरसकथनं । पुटपाकयोग्यद्रव्यविशेषकथनम् । ९, रोगविशेषे गुडूच्यादिविविधक्वाथविशेषोक्तिः । १०, फाण्टसन्यादिकथनं । ११, रोगविशेषे चिमौषधकथनं । १२, कल्कस्वरूपगुणकथनादि । १३, चूर्णौषधकथनं । १४, वटकमोदकगुटिकौषधकल्पना । १५, अवलेहौषधकथनं । १६, घृतपाचौषधकथनं । १७, नारायणतैलादिविविधतैलविशेषकथनं । १८, असवारिष्टनामकौषधकल्पना । १९, नानाविधधातुशोधनमारणकल्पना । २०, पारदादिनानारसभस्मधनमारणप्रकारः ।

२ खण्डे ।—२१, घृततैलवसामज्जादिचतुर्विधस्नेहपदार्थपानविधिः । २२, स्वेदविधिः । २३, वमनविधिः । २४, विरेचनविधिः । २५, वस्तिविधिः । २६, निरूहवस्तिविधिः । २७, उत्तरवस्तिविधिः । २८, नस्यविधिः । २९, धूमपानविधिः । ३०, गण्डूषविधिः । ३१, प्रलेपादिविधिः । ३२, रक्तस्रावविधिः । ३३, नेत्राञ्जनविधिः ॥

No. 791. प्रौढमनोरमा सविवरणा ।

Substance, country paper, 14½ × 5 inches. Folia, 141. Lines, 10 on a page. Extent, 6204 s'lokas. Character, Nágara. Date, Sm. 1834. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Praudhamanoramá. A commentary on the *Siddhánta Kaumudí.* By Bhattojí Dikshita, son of Lakshmídhara Súrí. Attached is a gloss on the commentary, by Harihara Dikshita, son of Víres'vara, and grandson of Bhattoji Dikshita. The name of the gloss is *Laghus'abdaratna.*

Beginning. टी० प्रा० । इत्यनुवर्त्तत इति । शबादीनां सार्वधातुकत्वाद्यर्थमिति भावः तेन न सार्वधातुकानुदात्तत्वसिद्धिरिति दिग्गिति ।

मू० प्रा० । धातोः । यद्यपि धातोरेकाचोऽत्लादेरिति सूत्राद्धातोरित्यनुवर्त्तत एव तथापि आर्द्धधातुकसञ्ज्ञाया आश्रितशब्दव्यापारत्वलाभाय पुनर्धातुग्रहणम् ।

End. टी० समा० । व्यवस्थितनयेति । छन्दसि सर्वविधीनां वैकल्पिकत्वादिति भावः । विकल्पव्यवस्थयेति व्यवस्थितविकल्पनेति यावत् । इत्यष्टमोऽध्यायः समाप्तः ।

Colophon. इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितवीरेश्वरपुत्रदीक्षितहरिहरविरचिते लघुशब्दरत्ने वैदिकी समाप्ता ।

मू० स० । चकारोऽनुक्तसमुच्चयार्थ इत्याशयेनाह । चिदिति । कृतीसाहचर्यमिति । अतिशब्दस्यान्येषामपीति दीर्घः । इत्यष्टमः ।

इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितायां प्रौढमनोरमायां वैदिकी समाप्ता ।

विषयः । सिद्धान्तकौमुद्याः तदन्तभागस्य व्याख्यानं । पुनस्तस्या एव स्त्रीलिङ्गावधि-स्त्रीप्रत्ययपर्यन्तस्य व्याख्यानं । पुनः स्वरवैदिकीप्रक्रियाख्यशेषभागस्य व्याख्या च । (आदौ मध्ये च खण्डितमेतत्)

No. 792. कूटमुद्गरः, सटीकः ।

Substance, country paper, 14 × 5½ inches. Folia, 5. Lines, 12 on a page. Extent, 140 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Generally correct.

Kútamudgara. Essays on Digestion and Dietetics. By Mádhava. Attached to the text is an anonymous commentary.

Beginning. टी० प्रा० । ॐ मधुराम्ललवणकटुतिक्तकषायाः षड्रसाः । तत्र त्रिभिरार्द्रैर्मधुराम्ललवणैः कफवातौ यथाक्रमं दृद्धिसमौ यातः । कफो दृद्धिं याति वातः शमं यातीत्यर्थः ।

मू० प्रा० । कफवातौ वातकफौ यातः पित्तञ्च दृद्धिसमौ ।
त्रिभिरार्द्रैस्त्रिभिरन्यैस्त्रिभिरार्द्रपरैस्तद्वन्यैश्च ॥ १ ॥

End. टी०परि० । किं ज्ञानेन निन्द्यज्ञाननेत्यर्थः । अल्पदर्शिना अल्पाध्ययनेन एतेन आत्मनः सविनयत्वमुक्तम् ॥ २० ॥

क्षीरमिव वारिविमिश्रं भज्यद्वेषेन(?) पीयते यद्वत् ।
हित्वा दोषमशेषं गुणमिह गुणिनो ग्रहीष्यन्ति ॥

मूलपरि० । भिषजा माधवेनेदं किं ज्ञानेनाल्पदर्शिना ।
यत्किञ्चिदुक्तमज्ञानात्तत् क्षमध्वं मनीषिणः ॥

Colophon. इति श्रीमाधवविरचितः कूटमुद्गरः समाप्तः ।

विषयः । मधुराम्लादिषड्रसगुणदोषकथनं । जीर्णाजीर्णान्नगुणदोषः । पानीयापानीयजलनिर्णयः । सन्निपातभेदादि । व्रणचिकित्साप्रकारः । पथ्यापथ्यनिर्देशश्च ।

No. 793. ज्योतिरतिरात्रं ।

Substance, country paper, 6¾ × 4 inches. Folia, 25. Lines, 7 on a page. Extent, 250 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Jyotiratirátra. Hymns and mantras for the performance of the Atirátra sacrifice.

Beginning. अथोक्थ्या लिख्यते । १२ १ १ २ १ १ २। १ १ २ १ १ २ १।
पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः । अभि-
२। १ १ २
विश्वानि काव्या ॥ १ ॥

End. ॐ वायिन्नँ हि गच्छथो युवं चित्रं ददथुर्भोजनान्नर। वोढेथाँ सूद्द-
तावते अर्वाग्यथँ समनसा नियाद्भिरच्छताम्। पाथिवतँ सो२३मा३
यां मा २३४ धा ॐ वा ई हा उवा॥ अस्॥ आश्विनग्रहान्ते भक्ष्यः।

Colophon. इति ज्योतिरतिरात्रः समाप्तः॥

विषयः। १, उक्थ्यजपः। २, बर्हिष्पवमानं। ३, आज्यानि। ४, माध्यन्दिनपवमानं।
५, रात्रिपर्यायः। ६, सन्धिः।

No. 794. श्रीमद्भागवतस्कन्धार्थनिरूपणं, वा हरिलीलाविवरणसङ्ग्रहः सूचीसहितः।

Substance, country paper, 12¾ × 5 inches. Folia, 33. Lines, 15 on a page. Extent, 1650 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, fresh. Prose and verse. Correct.

S'rimadbhágavata-skandhártha-nirúpaṇa, alias *Harililá-vivaraṇa-saṅgraha*. An abstract of the Bhágavata Puráṇa. By Vopadeva. The MS. is incomplete and comprises abstracts of the first five books only. Vide ante, p. 47.

Beginning. श्रीमद्भागवतस्कन्धाध्यायार्थादि निरूप्यते।
विदुषा बोपदेवेन मन्त्रिहेमाद्रितुष्टये॥ १॥
तत्र भागवतार्थसाह। आनन्दस्य हरेर्लीलावक्ता भागवतागमः।
स्कन्धैर्द्वादशभिः शाखाः प्रतन्वद्द्विजसेवितः॥ २॥

End. (पञ्चमस्कन्धपर्यन्तं वर्त्तते। अतः खण्डितत्वाच्छेषवाक्यं नास्ति)।

विषयः। श्रीभागवतस्य प्रथमस्कन्धावधिपञ्चमस्कन्धपर्यन्तानां पञ्चस्कन्धानामध्यायानामर्थः सङ्क्षेपेणात्र सङ्गृहीतः।

No. 795. अनुभवसारः।

Substance, country paper, 9½ × 4½ inches. Folia, 12. Lines, 12 on a page. Extent, 350 s'lokas. Character, Nágara. Date, Sm. 1872. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Anubhavasára. The essence of the Vedánta, or a treatise on salvation, according to the Vedánta doctrine. By Sachchidánanda Yati.

Beginning. जय जय सकलनिषेधशेषा । जय जय मायादिगुणवशेषा ॥
जय जय जडचैतन्यपरेशा । श्रीसदानन्द गुरुवरा ॥ १ ॥

End. तथा अवि त्यास चतुरानन । त्यालागि श्रीनारायण ॥
स्वयें उपदेशि आपण । चतुः श्लोकी भागवत ॥

Colophon. इति अनुभवसारग्रन्थे सच्चिदानन्दयतिविरचिते पञ्चमप्रकरणं समाप्तम् ।
(अतःपरं) अर्थाद्यैं यदा दृष्टिं गन्तुं चलति चान्तरे ।
निराधारा निर्विकारा या दशा सोन्मनी स्मृता ॥ (इत्यादयः)
काशी ब्रह्मेति विख्यातं तद्विवर्त्तो जगद्भ्रमः ।
अविवर्त्तं ततस्त्वाद्यः काशीति ब्रह्मवादिनः ॥ (इत्यन्ताः पञ्चश्लोकाः सन्ति)

विषयः । शारीरिकतत्त्व-ब्रह्मतत्त्व-जीवब्रह्मैक्यमोक्षोपायमुमुक्षुकर्त्तव्यादिकथनं ।

No. 796. नैगेयानां ऋक्षुदैवतं ।

Substance, country paper, 9 × 4 inches. Folia, 17. Lines, 10 on a page. Extent, 400 s'lokas. Character, Nágara. Date, Sm. 1674. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Naigeyánám rikshu-daivatam or simply *Naigeya.* An Index to the Sáma Veda, giving "the names of the poets, and the deities for the verses composing the Árchika of the Chhandogas according to the Sákhá of the Naigeyas, a subdivision of the Kauthumas." Max Muller, Ancient Sanskrit Literature, p. 227. The work comprises two prapáthakas, the first giving the poets and deities of the richás, and the second the same of trichás, ardharichás, &c.

Beginning. अथार्षमार्चिकस्याग्ने त्वमग्नेऽग्निरेत्रि त्वामग्ने भरद्वाजो वार्हस्पत्योऽग्निर्मेधातिथिः काण्वः प्रेष्ठमुशना काव्यस्त्वमः सुदीतिर्वार्हद्गिरसः सौहोत्रः पुरुमीळो वाते वत्सः काण्वोऽग्ने सुमित्रो वाप्रश्चो वप्रश्चो वानुरूपः ॥ १ ॥

End. आग्नरथाय ऐन्द्रो दृहस्पते दृहस्पतिः प्रथमेऽभिगोत्राणि दृहस्पतिः पञ्चमे दक्षिणा षष्ठे मरुतोऽष्टमे वरुणो नवम आदित्या दशम उद्वर्षय देवा अष्टमे मारुत्युत्तमोमोषां प्रथमाघो देवीकङ्का अष्टमे विरूपसूतीया सङ्ग्रामाशीर्मर्माण्-

तरे सङ्ग्रामाश्विषामैन्द्री मध्यमे वर्म प्रथमे सोमो द्वितीये वरीयस्तृतीये देवा-
श्चतुर्थ एकादशे चाग्निः सप्तमे भद्रं वैश्वदेव्यौ ।

Colophon. इति नैगेयानामृचुदेवतं समाप्तम् । द्वितीयः प्रपाठकः ।

विषयः । १ प्रपाठके, नैगेयानामृचामृषिदेवतनिर्णयः । २, तेषामेव ऋचार्द्धचपादाना-
मृचामृषिदेवतनिर्णयः ।

No. 797. त्रिस्थलीसेतुः ।

Substance, country paper, 11 × 4¾ inches. Folia, 103. Lines, 9 on a page. Extent, 2600 slokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, fresh. Prose and verse. Generally correct.

Tristhalísetu. A treatise on pilgrimage. By Náráyana Bhatta, son of Rámes'vara Súrí. The work is of some antiquity and great repute, having been extensively quoted by all subsequent writers on the subject. The MS. is incomplete, and breaks off at the end of the 10th chapter. Contents: 1. Propriety of pilgrimage to sacred pools or *tírthas;* tírthas defined. 2. Secondary tírthas; persons who should perform pilgrimage; difference in the merit of pilgrimages according to the conveyance used, &c. 3. Comparison of the merits of pilgrimages with penances; proper times for pilgrimages. 4. Rules for starting on pilgrimages. 5. Do. to be observed in the way; duties on arrival at a place of pilgrimage; fasts, and shedding of the hair of the head at tírthas. 6. Bathing at tírthas. 7. Offering of water to the manes; s'ráddhas; what to be offered and what forbidden at such s'ráddhas. 8. Who are fit to perform such s'ráddhas. 9. Gifts at such s'ráddhas &c. Throwing of the bones of the dead in tírthas. 10. General observations on the various topics above set forth.

Beginning. सरस्वतीं नमस्यामः प्रत्यूहव्यूहहानये ।
यदेकतानचित्तानां चित्ते संविच्चिरत्तमा ॥
विघ्नाधिप नमस्तुभ्यं विघ्नसङ्घं विघातय ।
प्रचयं रचयात्युच्चं बुद्धिशुद्धिं विधेहि मे ॥
उन्निद्रपद्मशतपत्रसगोचनेचं सुग्रीवमित्रमतिचित्रपवित्रपात्रं ।
उन्मीलनीलमणिवर्षसवर्णगात्रं रामं भजे कुलपतिं कमलाकलत्रं ॥

विश्वामित्रकुलोद्भवो विधुरिवाखण्डः कलानां निधि-
र्वाग्गुम्फे निखिलेऽपि यस्य वसुधा शिष्यप्रशिष्यैश्चिता ।
विद्या पद्मविकाशनैकतरणिः श्रीभट्टगोविन्दजः
सङ्ग्रावद्गणनाग्रणीर्विजयते श्रीभट्टरामेश्वरः ॥
श्रिता वाराणसी तेन नगरी नगरीयसी ।
यतोऽन्यनगरीछेमनगरीतिमुपेयुषी ॥
श्राखेध्वधीती पितुरेव यः श्रुतीः स्मृतीः समालोच्य च देशरीतीः ।
नारायणस्तत्तनयो विमुक्ते तीर्थत्रयीसेतुमसौ विधत्ते ॥
अन्योऽस्मिन् गुणगणवत्त्वमुच्यते चेत् स्वं प्रत्यं गुणगणवत्तमाह को न ।
तत्सन्तः शिरसि कृताञ्जलिस्तु याचे शेषं तत्सदसद्विहोच्यते मया यत् ॥
खलानां प्रार्थनैषेह खलताखलतासु वः ॥
भवतां भूषणेऽप्यत्र दूषणे मास्तु मानसं ॥

End. यत्र यत्र दृढा भक्तिर्यदा यस्य महात्मनः ।
तत्र तस्य महादेवः प्रसादमुपगच्छति ॥ इत्यादि बहुनालम् ।

Colophon. इति श्रीमद्विद्वन्मुकुटमाणिक्यश्रीमद्रामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थ-
लीसेतौ सामान्यप्रघट्टके प्रकीर्णकतीर्थधर्मप्रकरणं समाप्तं । समाप्तश्च प्रघट्टकः ।
इतः परं प्रयागप्रकरणं भविष्यति । (अत इदं पुस्तकमसम्पूर्णं)

विषयः । १ प्रघट्टके, तीर्थयात्राकर्त्तव्यतानिरूपणं । सामान्यतस्तीर्थप्रशंसा । तीर्थस्वरूपं ।
२, गोगुर्वादिगोप्तीर्थं । तीर्थयात्राधिकारिणः । तीर्थफलतारतम्यं । यानवि-
शेषेण तीर्थयात्रायां फलतारतम्यादि । ३, तीर्थस्नानफलविशेषेण सह कृच्छ्रा-
दिप्रायश्चित्तेन तुल्यता । तीर्थयात्रायां कालः । ४, तीर्थगमनविधिः । ५, तीर्थ-
यात्रायां नियमाः । तीर्थप्राप्तिदिनकृत्यं । तीर्थोपवासविधिविचारः । तीर्थ-
मुण्डनविधिविचारः । ६, तीर्थस्नानविधिः । ७, तीर्थतर्पणं । तर्पणीयव्यक्ति-
क्रमोल्लेखः । नदीरजोदोषाद्भवमासदिननिर्देशः । तीर्थश्राद्धविधिः । तीर्थश्राद्धे
निषिद्धद्रव्याणि । श्यामाश्यामश्राद्धादिविचारः । तीर्थश्राद्धे एकोद्दिष्टादिश्राद्धान्त-
समवाये निर्णयः । ८, तीर्थश्राद्धाधिकारिणः । ९, तीर्थश्राद्धे दानकालपार्वण-
श्राद्धादिनिर्णयः । तीर्थेऽस्थिनिक्षेपविधिः । १०, प्रकीर्णकतीर्थधर्मः । पुनरस्थि-
प्रक्षेपविधिः । प्रतिग्रहप्रतिषेधार्थं तीर्थगर्भनिर्णयादि ।
(साधारणस्तीर्थविधिः प्रथममुक्तः, प्रयागादिक्षयविधिः पश्चात्, इत्यत्र सङ्ग्रहः।)

No. 798. खण्डप्रशस्तिटीका ।

Substance, country paper, 8 × 3 inches. Folia, 131. Lines, 8 on a page. Extent, 2000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Khaṇḍa-pras'asti Ṭìká. A commentary on the Khaṇḍapras'asti, of Náráyaṇa, a poem in praise of the ten incarnations of Vishṇu. By Raghunátha.

Beginning. श्रीरामविघ्नेशगजाननादीन् प्रणम्य मातापितरौ पितृव्यं ।
नारायणञ्च प्रकरोति टीकां खण्डप्रशस्तेः रघुनाथनामा ॥

End. प्रख्यात इति । कल्की देवः वः कल्मषान् पापान् । पापं किल्बिषकल्मषमित्यमरः । चायतां रचतां । किं विधः । पुरी मथुरा तत्प्रभवतः प्रख्यातः प्रसिद्धः । प्रावृट् पयोदः वर्षाकालमेघः तद्द्युतिः तत्कान्तिः मेघश्यामः । बालः अल्पवयाः । दैत्येश्वराणां द्विषां वैरिणां काल इव दलयिता मारयिता किलेति पुराणादौ श्रूयते ।
पाठीनः कमठः किटिर्नरहरिः खर्वाकृतिर्भार्गवो
रामः कंसनिसूदनो दशबलः कल्की च नारायणः ।
अस्माकं सविभूतयेऽस्तु भगवान् सेतुर्भवाम्भोनिधा-
वुत्तारार्थ युगे युगे युगपतिस्त्रैलोक्यनाथो हरिः ॥
अत्र परिसमाप्तिसूचकं श्लेषवाक्यं नास्ति । (९२, पत्रात्परमसंलग्नपत्राङ्कलात् खण्डितमित्यनुमीयते ।)

विषयः । मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-राम-कृष्ण-कल्क्यवतारवर्णनं ।

No. 799. समरसारः, सटीकः ।

Substance, country paper, 13¾ × 5¼ inches. Folia, 24. Lines, 11 on a page. Extent, 816 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Generally correct.

Samarasára. An essay in verse on supernatural means for success in warfare. By Rámachandra. Attached is a commentary in prose by S'ivadása, son of S'úryadása Yati by Vis'álákshá. Contents. Calculations

to be made from the names of the belligerents as to the probability of success, onomancy. The same from those of the day of the week, the age of the moon and of the Nakshatra when war is declared. Calculation from initial letters of names. Do. from the letters, accents, &c., of do. Do. from the positions of armies on the different sides; obnoxious sides; calculations from the directions of the wind austromancy. Peculiar stellar conjunctions. Times improper for war. The snake diagram for calculating success in war. Knowledge of nakshatras from names. Calculations from the breath; considerations about the left and right sides. Connexion with women. Success of embassy by the nature of the breath. Success by putting on particular drugs. Various diagrams for assaults, blockade, &c. Reduction of forts, &c. Ornithomancy.

Beginning. मूलप्रा० । नत्वा गुरून् समालोच्य खरशास्त्राणि भूरिशः ।
वक्ष्ये युद्धजयोपायं धार्मिकानां महीक्षिताम् ॥

टीकाप्रा० । अभिवन्द्य रामचन्द्रं गुरुं तदुक्तखरग्रन्थम् ।
विदधेऽमि यथाप्रज्ञं तदभिहितार्थानुसारेण ॥
तत्र श्रीरामचन्द्रनामा ग्रन्थकृत् प्रारीप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहापोहाय शिष्टाचारपरिपालनाय गुरुप्रणामं चिकीर्षितं प्रतिजानीते । नत्वेति भूरिखरशास्त्राणि रुद्रयामलादीनि । युद्धशब्द उपलक्षणार्थः । तेन वादिप्रतिवादिद्यूतीसुभटद्यूतजन्मलादीनां जयपराजयोपायप्रतिपादकत्वमस्य ग्रन्थस्य । धार्मिकानामिति ग्रन्थाप्रामाण्यशङ्कानिवारणाय । यतलूपायप्रदर्शनोपायो ह्यपतिः परिपन्थिभिः पराभूयत एव रावणदुर्योधनवत् । नानामतबद्धनरखग्रन्थाविरोधं गुरुमतमनुसृत्य परिहरति तत्र श्रमेऽगमेत्यादि ॥

End. टीकापरि० । वंशे वत्समुनीश्वरस्य शिवदासाख्यादुरुख्यातितः
सञ्जाडग्रिचिदाप यस्य जनकः श्रीसूर्यदासोऽजनि ।
यन्मातुर्यशसा दिशो दश विशालाचा वलचा व्यधात्
स प्राच्यं खरशास्त्रसारविचितं रामोऽवसन्नैमिषे ॥

विषयः । युद्धादौ वादिप्रतिवादिनोर्नामलब्धाङ्कमादाय जयपराजयविचारप्रकारः । नक्षत्रतिथिवारादिद्वारा जयपराजयप्रकारः । अकारादिस्वराणां बालयुवावस्था । चकारादिस्वराणां ग्रहराशीशादिकथनं । मात्रावर्णादिस्वरसमूहकथनं । नामाक्षराङ्कन्यूनाधिकभावेन जयपराजयविचारः । भटानां पूर्वादिदिगवस्थितिद्वारा जयपराजयकथनादि । केतुचक्रादिविचारः । वायुबलज्ञानं । राज्ञयागिनीबलकथनादि । युद्धे वर्ज्यकालादि । युद्धे जयपराजय-

ज्ञानार्थं सर्पचक्रोक्तिः । दिक्शूलादि । नामाक्षरात् नक्षत्रज्ञानं । निश्वास-प्रश्वासादृत्तिसङ्ख्याविशेषैः पृथिव्यादिपञ्चभूतकथनं । पञ्चभूतफलं । वामदक्षिण-श्वासवहनद्वारा जयपराजयः । स्वरविशेषवहनकाले नारीसंसर्गे कृते नारी-वशीकरणं । नामाक्षरबलद्वारा द्यूतजयः । औषधिविशेषधारणेन जयपरा-जयः । स्थाय्यस्थायिनोर्जयपराजयज्ञानार्थककोटचक्रोक्तिः । दुर्गादौ ग्रह-वेधज्ञानार्थं सर्वतोभद्रचक्रं । आतुरसाध्यासाध्यज्ञानार्थं ऋणिधनिचक्रोक्तिः । श्रकुनोक्तिश्च ।

No. 800. गणपत्यादिपूजनपद्धतिः ।

Substance, country paper, 12 × 4¼ inches. Folia, 10. Lines, 10—11 on a page. Extent, 300 s'lokas. Character, Nágara, Date, S'K. 1744. Place of deposit, Calcutta, Government of India. Appearance, New. Prose and verse. Generally correct.

Rigveda-sañhitá-homavidhi. Directions for performing Rig Vedic homas, according to the school of Váskala.—The first two pages contain some excerpts unconnected with the text. The work begins on the 3rd page.

Beginning. अथ कमलाकरभट्टवचनं । तत्र मन्त्रः ।
ब्राह्मणाः सन्तु वै शान्ताः पापात् पान्तु समाहिताः ।
वेदानाञ्चैव दातारस्तातारः सर्वदेहिनाम् ॥ १ ॥
(इत्यादिश्लोकपाठानन्तरं ग्रन्थारम्भः)
नत्वोमामाधवौ देवौ ब्रह्मणे च स्वयम्भुवे ।
ऋग्वेदमन्त्रहोमस्य शौनकादिभ्य एव च ॥ १ ॥

ऋग्विधानादिकं दृष्ट्वा ऋग्वेदे देवताक्रमम्।
बालकृष्णः श्रोत्रियोऽत्र वच्मि होमविधानकम्॥ २॥

End. जातवेदाग्निं २। सूर्यं २। भावृत्तं २। सञ्ज्ञानं ४। ऋचा २१८। सूक्ते ४९।

Colophon. इत्यष्टमाष्टकः समाप्तः। इति शाकलसंहितायां अन्वाधानं समाप्तं।

विषयः। ऋग्वेदपारायणविधानं। ऋग्वेदपारायणकरणप्रकारदर्शनं। एतत्पारायणाङ्गीभूतहोमादिकथनञ्च।

No. 888. गङ्गास्नानविधिः।

Substance, country paper, 12 × 4¼ inches. Folia, 6. Lines, 10 on a page. Extent, 250 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Gaṅgá-snánavidhi. Directions for bathing in the River Ganges. Anonymous.

Beginning. अथ गङ्गास्नानविधिः। यानानि तु परित्यज्य भाद्यं पादचरैर्नरैः।
लुठित्वा लोटणेश्चैव कृत्वा कर्पाटिकाकृतिम्॥ इति। साष्टाङ्गं प्रणम्य।

End. गङ्गास्नानसाङ्गतासिद्ध्यर्थं गोदानं दत्वा दशाधिकान् ब्राह्मणान् भोजयित्वा तेभ्यो दक्षिणां दत्वा चाशिषो गृहीत्वा विष्णुं स्मरेत्।

Colophon. इति गङ्गास्नानविधिः।

विषयः। गङ्गास्नानविधिकथनं।

No. 889. गकारादिगणपतिसहस्रनामस्तोत्रम्।

Substance, country paper, 12 × 4¼ inches. Folia, 9; line 10 on a page. Extent, 250 s'lokas. Character, Nágara. Date, Sk. 1713. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse. Generally correct.

Gakárádi-ganapati-sahasra-náma-stotra. A hymn in praise of Ganes'a in which a thousand epithets, each beginning with the letter ग, are strung together. Síva recited the hymn at the request of his consort. The work is alleged to be a section of the Rudrayámala Tantra.

Beginning. कैलासशिखरे रम्ये सुखासीनं त्रिलोचनं ।
प्रणम्य शिरसा नाथं पार्वती पर्य्यपृच्छत ॥ १ ॥
त्वत्तः श्रुतं पुरा देव गणेशस्य महात्मनः ।
नाम्नां सहस्रं तच्चित्रं गकारादिकमिष्टदम् ॥ २ ॥

End. इति श्रुत्वा महादेवादेवी विस्मृतमानसा ।
पूजयामास विधिना गणेश्वरपदद्वयम् ॥ ८२ ॥

Colophon. इति श्रीरुद्रयामले शिवपार्वतीसंवादे गकारादिगणपतिसहस्रनामस्तोत्रं सम्पूर्णम् ।

विषयः । गकारादिशब्दैर्घटितगणपतिसहस्रनामकथनं ।

No. 890. महागणपतिसहस्रनामस्तोत्रं ।

Substance, country paper, 12 × 4½ inches. Folia, 10. Lines, 10 on a page. Extent, 200 s'lokas. Character, Nágara. Date, Sk. 1712. Place of deposit, Calcutta, Bábu Rájendralála Mitra. Appearance, new. Verse: Generally correct.

Mahágaṇapati-sahasra-náma-stotra. A hymn in praise of Ganes'a in which a thousand epithets are strung together. This hymn is said to have been recited by Ganes'a himself at the request of his father S'iva, with a view to ensure success in the battle against Tripurásura. It professes to be an extract from the Ganes'a Puráṇa.

Beginning. व्यास उवाच । कथं नाम्नां सहस्रं स्वं गणेश उपदिष्टवान् ।
शिवायैतन्ममाचक्ष लोकानुग्रहतत्परः ॥ १ ॥
ब्रह्मोवाच । देव एवं पुरा रात्रिः पुरत्रयजयोद्यमे ।
स्वनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल ॥ २ ॥
मनसा संविनिर्धार्य ततस्तद्विघ्नकारणम् ।
महागणपतिं भक्त्या समभ्यर्च्य यथाविधि ॥ ३ ॥
विघ्नप्रशमनोपायमपृच्छद्परान्जितः ।
सन्तुष्टः पूजया शम्भोर्महागणपतिः स्वयं ॥ ४ ॥
ततस्तस्मै स्वकं नाम्नां सहस्रमिदमब्रवीत् ।
सर्वविघ्नैकहरणं सर्वकामफलप्रदम् ॥ ५ ॥

End. नमो नमः सुरवरपूजिताङ्घ्रये नमो नमो निरुपममङ्गलात्मने ।
नमो नमो विपुलदयैकसिन्धवे नमो नमः करिकलभाननाय ते ॥ ४२ ॥

Colophon. इति श्रीमद्गणेशपुराणे उपासनाखण्डे महागणपतिसहस्रनामस्तोत्रं सम्पूर्णम् ॥

विषयः। त्रिपुरासुरवधसमये विघ्ननिरासार्थं शिवदृष्टेन गणपतिना प्रोक्तं स्वकीयसहस्रनामस्तोत्रमिदम्।

No. 891. सरस्वतीस्तोत्रम्।

Substance, country paper, 12 × 4¼ inches. Folia, 5. Line, 11—13 on a page. Extent, 150 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse. Generally correct.

Sarasvatí-stotra. A hymn in praise of Sarasvatí, being an extract from the *Sudarsana Saṅhitá.* The hymn is designed to ensure the instantaneous acquisition of profound knowledge.

Beginning. अस्य श्रीशुक्लासरस्वतीस्तोत्रमन्त्रस्य आश्वलायन ऋषिः सग्धराच्छन्दः श्रीशुक्लासरस्वती देवता महाशुक्लसरस्वतीप्रीत्यर्थे जपे विनियोगः।

End. सर्वपापविनिर्मुक्तः सुभगो लोकविश्रुतः।
वाञ्छितं फलमाप्नोति स्वर्लोके नात्र संशयः ॥ १० ॥

Colophon. इति श्रीसुदर्शनसंहितायां पूर्वभागे उमामहेश्वरसंवादे सद्योमतिप्रसादसरस्वतीस्तोत्रं सम्पूर्णम्।

विषयः। सद्योबुद्धिप्रदसरस्वतीस्तोत्रकथनं ;

No. 892. सरस्वतीस्तोत्रं, त्रिपुरसिद्धान्तीयं।

Substance, country paper, 12 × 4¼ inches. Folia, 4. Lines, 11 on a page. Extent, 150 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Vis'vanátha S'ástrí. Appearance, new. Verse. Correct.

Sarasvatí-stotra. A short hymn in praise of Sarasvatí, said to have been composed by Ás'valáyana. It is preceded by certain directions for reciting it in the way which is likely to prove most effectual.

Beginning. अथ साधारणसरस्वतीमन्त्रविधिः। कृतनित्यक्रियः शुक्लाम्बरधरो भूतशुद्ध्यादि विधाय देशकालौ सङ्कीर्त्य ममामुककामनासिद्ध्यर्थं धारणासरस्वतीमन्त्रजपमहं करिष्ये इति सङ्कल्प।

End. शारदा शारदाम्भोजवदना वदनाम्बुजं ।
सर्वदा सर्वदास्माकं सन्निधिः सन्निधिः क्रियात् ॥ २१ ॥

Colophon. इत्याश्वलायनप्रोक्तं सरस्वतीस्तोत्रं सम्पूर्णम् ।

विषयः । श्रुतधरसरस्वतीमन्त्रजपादिप्रकारः । महासरस्वतीस्तोत्रञ्च । (अत्र सरस्वतीस्तोत्रद्वयं । तत्र महासरस्वतीस्तोत्रस्य आश्वलायनः कर्त्ता ।)

No. 893. अपामार्जनस्तोत्रं ।

Substance, country paper, 12 × 4¼ inches. Folia, 7. Lines, 11 on a page. Extent, 175 s'lokas. Character, Nágara. Date, Sk. 1712. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse. Generally correct.

Apámárjana-stotra. A charm for the cure of fever, dysentery, and other diseases. It is an extract from the Vishnudharma Puráṇa.

Beginning. अथातः सम्प्रवक्ष्यामि अपामार्जनमुत्तमम् ।
पौलस्त्येन तथा प्रोक्तं दाल्भ्यस्य च महात्मनः ॥ १ ॥
भक्तिभावेन सम्पूज्य प्राणिनां हितकाम्यया ।
सर्वरोगविदोषाणां नाशनं मङ्गलप्रदं ॥ २ ॥
योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणात्मने भगवते पुरुषाय तुभ्यम् ॥ ३ ॥

End. पठतां शृण्वतांचैव ददाति परमां गतिं ।
निरपेक्षैः प्रकर्त्तव्यं नान्यथा सिद्धिदं ह्येतः ॥ १६० ॥

Colophon. इति श्रीविष्णुधर्मोत्तरे दाल्भ्यपुलस्त्यसंवादे अपामार्जनस्तोत्रं सम्पूर्णं ।

विषयः । ज्वरातीसारादिरोगशान्तिकरमन्त्रविशेषोक्तिः ।

No. 894. दत्तकपुत्रविधानं ।

Substance, country paper, 12 × 4¼ inches. Folia, 3. Lines, 9 on a page. Extent, 125 s'lokas. Character, Nágara. Date, Sk. 1714. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Correct.

Dattakaputra-vidhána. Ceremonial rites to be observed when adopting a son. By Nṛisiñha Bhaṭṭa.

Beginning. अथ दत्तकपुत्रविधानं। श्रानकसूता। इदानीं सम्प्रवच्यामि पुत्रसङ्ग्रहमुत्तमं।
बन्ध्यो मृतप्रजो वापि पुत्रार्थं समुपोष्य च।
आधाय विधिवद्वह्निं स्वगृह्योक्तेन वर्त्मना॥ इत्यादि।

End. गुरवे यथाशक्ति दक्षिणां दत्वा अन्येभ्या ब्राह्मणेभ्यो यथाशक्ति भूयसीं दक्षिणां दत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा आशिषो गृह्णीयात्।

Colophon. इति नृसिंहभट्टविरचितायां दत्तकपुत्रविधानं समाप्तम्।

विषयः। दत्तकपुत्रग्रहणविधिः।

No. 895. वास्तुपूजाविधिः।

Substance, country paper, 12 × 4¼ inches. Folia, 5. Lines, 11 on a page. Extent, 150 s'lokas. Character, Nágara. Date, Sk. 1717. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Correct.

Vástupújá-vidhi. Directions for worshipping the presiding divinity of a dwelling when a new house is about to be occupied. The sage S'ákala is said to be the author of the work.

Beginning. अथ शाकलोक्तवास्तुपूजाविधिः। यथा।
शाकलोऽहं प्रवक्ष्यामि वास्तुपूजाविधिं क्रमात्।
तचादौ सम्परिच्चेचे भूमिं सदनसिद्धये॥
निर्विवादामपामार्गकण्टक्यादिविवर्जिताम्।
मध्ये निम्नां प्राक्प्रवणां किञ्चित् सर्वच उच्छ्रिताम्।

End. ततस्तस्मिन्नेव दिने शुभे मुहूर्त्ते प्रवेशः। ततः सोत्साहः मित्रैरिष्टैश्च बन्धुभिः सह भुञ्जीतेति सङ्क्षेपो वास्तुशान्तिप्रयोगः।

Colophon. इति वास्तुशान्तिप्रयोगः समाप्तः।

विषयः। शाकलमतानुयायिवास्तुपूजाविधिकथनं।

No. 896. वास्तुशान्तिः, आश्वलायनगृह्योक्ता ।

Substance, country paper, 12 × 4¼ inches. Folium, 1. Lines, 20. Extent, 25 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, fresh. Prose. Correct.

Vástus'ánti. Directions for performing certain rites for overcoming the evil effects of adverse planets on a dwelling. The work professes to be founded on the rules of Ás'váláyana as given in his Grihya Sútra. By Rámakṛishṇa Bhaṭṭa.

Beginning. इदानीं सूचोक्ता वास्तुशान्तिरभिधीयते। सा च द्विजानां पूर्वोक्तया रीत्या समुच्यते। पूर्वोक्तायां लग्नशो खखसूचोक्त्यैव कर्तव्या ।

End. तैः शिवं वास्तुशिवं वास्तु इत्युक्तम्। सुहृदुनो भुञ्जोतेति विशेषं गृहसज्जकरणे ह्येतदिष्यते, साधारणशान्तिवत् ।

Colophon इति श्रीभट्टरामकृष्णरचिता आश्वलायनगृह्योक्तवास्तुशान्तिः ।

विषयः । आश्वलायनगृह्योक्तसङ्क्षिप्तवास्तुशान्तिविधिकथनं ।

No. 897. मण्डपपूजा ।

Substance, country paper, 12 × 4¼ inches. Folia, 5. Lines, 10 on a page. Extent, 125 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Maṇḍapapújá. Worship of the Maṇḍapa, or Hall of Sacrifice, before commencing the Agnyádhána and other fire sacrifices. The MS. is incomplete.

Beginning. कर्माङ्गत्वेन मण्डपपूजनविधिः । पूर्वस्यां दिशि मण्डपद्वाराद्बहिर्देशमारभ्य अश्वत्थतोरणं सुदृढनामकं सुशोभननामकं वा शङ्कुचिह्नितं ।

End. (शेषे खण्डितत्वाच्चरमवाक्यादिकं न लिखितं ।)

विषयः । अग्न्याधानादिकार्यानुष्ठानार्थं कृतस्य मण्डपाख्यगृहस्य प्रतिष्ठाविधिकथनं । (मण्डपप्रतिष्ठानन्तरमत्र अग्निप्रतिष्ठाद्यन्यत्कर्मारभ्य दृश्यते, परन्तु शेषखण्डितत्वान्न तद्विषयप्राप्तिः ।)

No. 898. गायत्रीपुरश्चरणविधिः ।

Substance, country paper, 12 × 4¼ inches. Folia, 8. Lines, 10 on a page. Extent, 200 slokas. Character, Nágara. Date, Sk. 1716. • Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Correct.

Gáyatrí-purus'charaṇa-vidhi. Directions for performing certain ceremonies for acquiring proficiency and mastery over the Gáyatrí. Anonymous.

Beginning. अथ गायत्रीन्यासप्रारम्भः । ॐ ह्रां आत्मतत्त्वं शोधयामि स्वाहा । ॐ ॐ परतत्त्वं शोधयामि स्वाहा । ॐ मं ह्रं परात्परतत्त्वं शोधयामि स्वाहा ।

End. सुरभिज्ञानपूर्वश्च योनिः कूर्मोऽथ पङ्कजं ।
लिङ्गनिर्वाणमुद्राश्च जपान्तेऽष्टौ च कारयेत् ॥
जपं निवेद्य ईश्वरार्पणं कुर्यात् ।
यदक्षरपदं भ्रष्टं मात्राहीनञ्च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

Colophon. इति पुरश्चरणविधिः समाप्तः ।

विषयः । अङ्गप्रत्यङ्गेषु गायत्र्यक्षरविन्यासकथनं, गायत्रीमानसीपूजा, गायत्रीशापमोचनं, गायत्रीमन्त्रस्य ब्रह्मास्त्राग्नेयास्त्रादिकरणप्रकारः । गायत्रीजपविधिः । उत्तरन्यासविधिश्च ।

No. 899. सङ्क्षेपगायत्रीन्यासप्रयोगः ।

Substance, country paper, 12 × 4¼ inches. Folia, 4; lines, 10 on a page. Extent, 100 slokas. Character, Nágara. Date, Sk. 1715. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Correct.

Saṅkshepagáyatrí-nyása-prayoga. A brief manual for the adoration of the Divinity through the Gáyatrí. Anonymous.

Beginning. अथ सङ्क्षेपगायत्रीन्यासः । ॐ इत्यादि • कृतपूर्वसङ्कल्पसिद्धिद्वारा श्रीपरमेश्वर • पूर्वसङ्कल्पितचतुर्विंशतिलक्षात्मकगायत्रीपुरश्चरणमध्ये यथाशक्ति गायत्रीजपमहं करिष्ये, तदङ्गविचित्तं शरीरशुद्धिपूर्वकं गायत्रीमन्त्रजपाधिकारसिद्ध्यर्थं पवनभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकावहिर्मातृकागायत्रीन्यासांश्च करिष्ये ।

End. त्वं मातः सर्वदेवानां प्रीतिदा शुभदा भव ।
शुभं कुरुष्व मे भद्रे यशो वीर्यञ्च सर्वदा ॥ २ ॥
जपं कुर्यात् । जपान्ते षडङ्गं कृत्वा । मुद्राः ।
सुरभिर्ज्ञानमूर्धञ्च योनिः पङ्कजपङ्कजं ।
लिङ्गनिर्वाणमुद्राश्च जपान्तेऽमी प्रदर्शयेत् ॥

Colophon. इति सङ्क्षेपगायत्रीन्यासः ।

विषयः । अङ्गप्रत्यङ्गादिषु गायत्र्यक्षरविन्यासेषसङ्क्षिप्तन्यासकथनं, गायत्रीमानसपूजनादिकथनञ्च ।

No. 900. गायत्रीब्रह्मकल्पः ।

Substance, country paper, 12 × 4¼ inches. Folia, 10. Lines, 10—11 on a page. Extent, 275 slokas. Character, Nágara. Date, Sk. 1715. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Gáyatrí-brahmakalpa. This work is similar to the last two, and treats of the same subject. It professes to be founded on the Rig-vidhána Bráhmana. Anonymous.

Beginning. अथ ब्रह्मकल्पे गायत्रीकल्पं व्याख्यास्यामः । नारद उवाच ।

गायत्र्याः कीदृशं न्यासं वर्णरूपञ्च कीदृशं ।
ऋषिञ्च देवता च्छन्दो आवाहनविसर्जनं ॥ १ ॥
हृदयञ्च शिखा गोचं तथा शीर्षञ्च कीदृशं ।
विनियोगस्तथा कुक्षिं पादौ तु परमेश्वर ॥ २ ॥
ध्यानं मुखञ्च माहात्म्यं पदन्यासविधिं ततः ।
तदहं श्रोतुमिच्छामि ब्रूहि मे कमलासन ॥ ३ ॥

End. गायत्र्या न परं जाप्यं गायत्र्या न परं तपः ।
गायत्रीं जपमानस्य पुनर्जन्म न विद्यते ॥ ४२ ॥

Colphon. इति श्रीऋग्विधाने ब्रह्मनारदसंवादे गायत्रीब्रह्मकल्पः समाप्तः ।

विषयः । गायत्रीध्यानविशेषवर्णनं । आसनशुद्ध्यादिकथनं । गायत्रीमन्त्राक्षरन्यासादिन्यासप्राणायामादिकथनं । मुखसम्पुटादिचतुर्विंशतिमुद्रानामकथनादि । गायत्र्यास्त्रैकालिकध्यानं, गायत्रीपूजनप्रकारः । गायत्रीजपोत्तराङ्गन्यासादिकथनं । सन्ध्याङ्गीभूतगायत्रीतर्पणं । गायत्रीजपाङ्गीभूतहोमप्रकारश्च ।

No. 901. स्मार्त्तप्रायश्चित्तप्रयोगः, स्मार्त्तप्रायश्चित्तोद्धारोयः।

Substance, country paper, 12 × 4½ inches. Folia, 27. Lines, 10 on a page. Extent, 1300 s'lokas. Character, Nágara. Date, Sk. 1715. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Smárta-práyas'chitta-prayoga. A treatise on expiations and purifications. By Divákára Bháṭṭa, son of Mahádeva, and grandson of Bhaṭṭa Rames'vara, who had the soubriquet of Kála.—The author enjoys high reputation as a correct expounder of the Smṛiti, and several standard compilations on law are attributed to him.

Contents: expiations for neglecting certain necessary ablutions and bathing; do. for allowing the proper times for the daily triple prayers to pass without performing the necessary ceremonies for those occasions; do. for the removal of diseases caused by sins; do. for bad dreams; do. for sneezing and yawning; do. for incest; do. for sleeping at the moment of sundown; do. for certain wild birds sitting on the house-top; do. for neglect of the household sacred fire caused by a man's absence from home for more than ten days while earning his livelihood in a foreign country; do. for accidental blowing out of the sacred fire; do. for being called away on a business after commencing a fire sacrifice; do. for irregularities in the performance of Ishṭi sacrifices; do. for the dropping out of burning embers from the altar and other accidents; defects in offerings; expiations in connexion with the *Piṇḍapitriyajña;* purification of sacrificial vessels.

Beginning. अथ स्मार्त्तसूचप्रायश्चित्तानि वक्ष्यन्ते। तत्रादावावश्यकविशेषानित्यप्रायश्चित्तानि वक्ष्यन्ते। तत्रादौ शौचमाह, मनुः।

शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः।
शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥ इति। तदेतद्द्विविधं।

End. कर्मसमाप्तिसमयेऽङ्गलोपे ज्ञातेऽज्ञाते वा प्रायश्चित्तमाह, प्रजापतिः।

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
प्रायश्चित्तान्यशेषाणि ततः कर्मात्मकानि वै।
यानि शेषमशेषाणां (?) कृष्णानुस्मरणं परं॥

Colophon. इति श्रीमत्कालोपनामकभट्टरामेश्वरात्मजमच्चादेवद्विजवर्यसूनुभट्टदिवाकरविरचितस्मार्त्तप्रायश्चित्तोद्धारे षड्विंशप्रयोगरूपेण नित्यनैमित्तिकप्रायश्चित्तानि कारिकायुक्तानि निरूपितानि । (इतः परं पञ्चविंशतिपङ्क्त्यात्मकः पाठोऽस्ति । तत्राचमनप्राणायामादिविधिकथनं ।)

विषयः । शौचविधिः, स्नानविधिः, अकरणप्रायश्चित्तं । सन्ध्याकालातिक्रमप्रायश्चित्तं । व्याधिनाशप्रायश्चित्तं । दुःस्वप्नशान्तिः । क्षुच्छृन्भादिशान्तिः । अगम्यागमनप्रायश्चित्तं । स्नापकाले सूर्य्यास्ते सति प्रायश्चित्तं । आगारोपरि आरण्यकपोतविश्रोषोपवेशनप्रायश्चित्तं । धनार्जनार्थं प्रवासं गतो दशदिवसेभ्यः परत आगच्छेत् चेत्तत्र प्रायश्चित्तं । अग्निनाशप्रायश्चित्तं । अन्वाहितान्नियोगात् प्रागनुगते प्रायश्चित्तं । दृष्टिगतवैगुण्यनिमित्तकप्रायश्चित्तं । आयतनाग्निस्खलनादिवज्रविधनैमित्तिककर्मप्रायश्चित्तं । हविर्दोषकथनं । पिण्डपितृयज्ञाद्यकरणे प्रायश्चित्तं । यज्ञपात्रादिशुद्धिः ।

No. 902. प्रातिशाख्यं ।

Substance, country paper, 12 × 4¼ inches. Folia, 22. Lines, 10 on a page. Extent, 660 slokas. Character, Nágara. Date, Sk. 1719. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Generally correct.

Prátis'ákhya. Phonology of the Rig Veda. By S'aunaka. The work comprises three chapters (*Adhyáyas*), and 18 sections, (*Patalas.*) Contents: (I), 1, letters; 2, combinations and mutations of vowels; 3, accents; 4 to 6, combinations and mutations of consonants; (II) 7 to 10, circumflex accent; 11, elision of nasals, &c.; 12, compound letters; (III) 13, origin of letters; 14, powers of letters; 15, rules for reading the Veda within certain prescribed times; 16 to 18, metres, their feet and presiding divinities. Two editions of the work have already appeared, one with a French translation in the Journal Asiatique, and the other with a German version in Max Müller's Rig Veda, oder die Heiligen Lieder der Brahmanen. Leipzig, 1856.

Beginning. परावरे ब्रह्मणि यः सदाऽर्वेदात्मानं वेदनिधिं मुनीन्द्राः ।
तं पद्मगर्भः परमं त्वादिदेवं प्रणम्य च लक्षणमाह शौनकः ॥
माण्डूकेयः संहितां वायुमाह तथाकाशं चास्य माहुस्य एव ।
समानतामनिले चाम्बरे च गलागस्थो विपरिहारं तदेव ॥

अथात्मसंस्कृतो गुरवीरः सुतात्र वाङ्मनसयोर्विवदन्त्यानुवूर्व्यं ।

End. यच्छन्दसां वेद विशेषमेतं भूतानि च चैष्टुभजागतानि ।
सर्वाणि रूपाणि च भक्तिनेो यः स्वर्गं जयत्येभिरथाप्तत्तत्वम् ॥ १८ ॥

Colophon. इति प्रातः(ति)शाख्येऽष्टादशपटलः । इति तृतीयोऽध्यायः समाप्तः ।

विषयः । १ अध्याये ।—१ पटले, वर्णादिनिर्णयः । २, स्वरसन्धिविचारकथनादि । ३, उदात्तादिस्वरविचारकथनादि । ४, ५, ६, हल्सन्धिकथनादि ।
२ अध्याये ।—७, ८, ९, १० पटलेषु, मोदाहरणप्लुतादिविचारकथनं । ११, नकारादिवर्णलोपविचारः । १२, संयुक्तवर्णविचारः ।
३ अध्याये ।—१३, वर्णोत्पत्तिप्रकारकथनादि । १४, वर्णगुणकथनादि । १५, पारायणप्रकारकथनादि । १६, गायत्र्यादिछन्दःकथनं । १७, १८, छन्दसां दैवतपादनिर्णयकथनं ।

No. 903. अद्भुतशान्तिः ।

Substance, country paper, 12 × 4¼ inches. Folia, 4. Lines, 11 on a page. Extent, 166 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Adbhuta-s'ánti. A fragment of the Adbhuta Bráhmaṇa of the Sáma Veda. The whole of the Adbhuta Bráhmaṇa has been published by Professor Weber in the transactions of the Berlin Academy for 1865.

Beginning. अथ दशाद्भुतशान्तिप्रारम्भः । देवाश्च ह वा असुराश्चैषु लोकेषु लोकेषु स्पर्धन्ते ते देवाः प्रजापतिमुपाधावन् तेभ्य एतां दैवीं शान्तिं प्रयच्छते । ततः शान्तिका असुरानभ्यजयत्ततो वै देवा अभवन् परासुराः ।

End. ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत ॥ १९ ॥

Colophon. इत्यद्भुतशान्तिः । (इतः परं "सुमुखश्चेत्यादिः, आचार्यवरणमहं करिष्ये" इत्यन्तः पङ्क्तिचतुष्टयात्मकः पाठोऽस्ति ।)

विषयः । यानकत्वादेकदेशभङ्गशान्तिः । पश्वाद्यरिष्टशान्तिः । शलभादीनिदोषशान्तिः । दुर्दशादिशान्तिः । अकालफलपुष्पादिशान्तिः । रुधिरवर्षादिशान्तिः । पक्षपदपश्वादिशान्तिः । उल्कापातादिशान्तिः । हीनाधिकाङ्गशान्तिः । स्वकालगर्भाप्रसवादिशान्तिः । देवतायतनकम्पादिशान्तिः ।

No. 904. शान्तिकल्पदीपिका ।

Substance, country paper, 12 × 4¼ inches. Folia, 10. Lines, 10 on a page. Extent, 250 s'lokas. Character, Nágara. Date, Sk. 1714. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

S'ántikalpadípiká. Expiations for certain accidents to the sacred household fire. Anonymous. Contents: Expiation for a frog falling into the fire; do. for a chameleon falling into the fire; do. for a buffalo calving on a Wednesday when the moon is in the Múla Nakshatra in the month of Mágha; do. for a mare foaling in the month of Srávaṇa; do. for a cow calving in the month of Bhádra; do. for using abusive language towards respectable people; do. for bad dreams; do. for diseases, fever, dysentery, &c., resulting from sin; do. for suddenly becoming fat or lean; do. for the appearance of comets; do. for eclipses; do. for the union of two months under inauspicious stellar conjunctions; do. for adverse planets; do. for epidemics; do. for boils and epizootics; do. for blight in corn; do. for images of gods perspiring; do. for a sudden breaking down of a tree; do. for two lotuses growing on a single stalk; do. for unseasonable rains, &c.; do. for hot-water rain; do. for sudden springing of water in rivers, tanks, and wells; do. for twins born of cows, buffaloes, and ewes; do. for domestic animals taking their abodes in the wilderness, or wild animals betaking themselves to villages or towns; do. for white-ants attacking a house; do. for animals other than tigers, cats, and snakes, destroying their offspring; do. for cracking or quaking of the earth; do. for injury to the voice of animals used by man as vehicles; do. for halos seen round the sun or moon, and for the fall of meteors.

Beginning. अथ मण्डूकाग्निप्रवेशशान्तिप्रयोगः । यजमानः स्नाननित्यक्रियः शुद्धासने सपत्नीक उपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य अस्माकं सहकुटुम्ब॰ मम गृहे पचनाग्नौ मण्डूकप्रवेशजनितसकलारिष्टशान्त्यर्थं सकलपीडापरिहारार्थं शुभफलप्राप्त्यर्थमाचार्यत्विग्द्वारा मण्डूकाद्भुतशान्तिं करिष्ये ।

End. गोसूक्तजपः शान्तिसूक्तरुद्रकपोतसूक्तशकुनसूक्तजपः ।

Colophon. इति निर्घातादिशान्तिः । इति शान्तिकल्पदीपिका समाप्ता ।

विषयः । पचनाग्नौ मण्डूकपतनजन्यशान्तिः । पक्षीशरटपतनशान्तिः । माघे बुधवारे वा

मूलनक्षत्रे मद्विधौ प्रसूते चेत् तच्छान्तिः । श्रवणे वडवा प्रसूते चेत् तच्छान्तिः । सिंहस्थे सूर्ये गाः प्रसूते चेत् तच्छान्तिः । मूलाश्लेषानक्षत्रजातबालकशान्तिः । सुवर्णनाशशान्तिः । दग्धवस्त्रशान्तिः । वाक्पारुष्यशान्तिः । दुःस्वप्नशान्तिः । ज्वरशान्तिः । अतीसारादिशान्तिः । अकस्मात् क्षुरशूलादिभवनशान्तिः । धूमकेतुशान्तिः । ग्रहणशान्तिः । दुष्टसङ्क्रान्तिशान्तिः । ग्रहयुद्धादिशान्तिः । जनपीडामहाशान्तिः । विस्फोटपशुरोगादिशान्तिः । धान्यादिविकृतिशान्तिः । प्रतिमास्खेदोत्पातादिवैकृतिशान्तिः । अकस्मात् तरुभङ्गादिशान्तिः । एकमासोत्पन्नकमलद्वयादिशान्तिः । अकालदृष्ट्यादिशान्तिः । उष्णोदकदृष्ट्यादिशान्तिः । शुष्कनदीकूपादौ चटाज् जलोत्पत्तौ शान्तिः । गोस्त्रीमहिष्यादिषु युग्मादिप्रसवशान्तिः । ग्राम्यारण्यप्राणावासविनिमयादिशान्तिः । गृहे वल्मीकोत्पत्त्यादिशान्तिः । व्याघ्रविड़ालसर्पादिव्यतिरिक्ताः प्राणिनः परस्परं स्ववासकं भक्षयन्ति चेत् तच्छान्तिः । भूविदारभूकम्पादिशान्तिः । वाहनखरादिवैकृत्यशान्तिः । चन्द्रसूर्यमण्डलदर्शननिर्घातोल्कापातादिशान्तिश्च ।

No. 905. अशौचनिर्णयः ।

Substance, country paper, 12 × 4¼ inches. Folia, 4. Lines, 14—15 on a page. Extent 200 s'lokas. Character, Nágara. Date, Sk. 1742. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

As'aucha-nirnaya. Impurities of the person caused by death or birth in one's family or tribe. By Tryambaka Pandita.

Beginning. गणाधिपं नमस्कृत्य प्रत्यूहादिपविं कविं ।
त्र्यम्बकेणाशुबोधाय क्रियते शौचनिर्णयः ॥ १ ॥
अथातः शब्दतश्चेह पौनरुक्त्यं न दुष्यति ।
स्फुटबोधाय बालानां ग्रन्थोऽयं रच्यते यतः ॥ २ ॥

End. एतच्च चिराचं दशाहोर्द्धं संस्कारकरणे ज्ञेयम् । दशाहमध्ये तु शेषदिवसैरेवाशौचसिद्धेरुक्तत्वात् ।

Colophon. इति श्रीयाचजूकशिखामणित्र्यम्बकपण्डितकृताशौचनिर्णयः समाप्तः ।

विषयः । जननमरणाशौचव्यवस्थाकथनं ।

No. 906. नकुलेश्वरीमन्त्रविधानं ।

Substance, country paper, 12 × 4½ inches. Folia, 2. Lines, 14—15 on a page. Extent, 62 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Nakules'vari-mantra-vidhána. Mantras for the adoration of a form of the goddess Durgá named Nakules'varí, or the "Mistress of the ichneumon." By Tryambaka. The MS. is incomplete.

Beginning. नकुलीवागीश्वरीमन्त्रविधानप्रारभ्यः । सुमुखस्येत्यादि । स्यष्टार्थं (?) । नकुलीवागीश्वरीमन्त्र(स्य) ऋमुकसङ्ख्यकजपमहं करिष्ये ।

End. (खण्डितत्वाच्छेषवाक्यादि न लिखितं ।)

विषयः । नकुलीवागीश्वरीमन्त्रतत्पुरश्चरणादिकथनं ।

No. 907. शाङ्खायनसूत्रम् ।

Substance, country paper, 9½ × 3¾ inches. Folia, 70. Lines, 9—12 on a page. Extent, 1500 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'áṅkháyana Sútra. The Kalpa Sútra of Sáṅkháyana. The MS. is defective both at the beginning and at the end. Vide No. 665.

Beginning. (प्रथमपत्राभावात् द्वितीयपत्रपाठो लिख्यते)

यास्चैा वचनादन्यदुचैर्न्यायस्यर्ग्वे(?)वचनादुपांश्वित्यादिः ।

End. चित्राश्चित्राभिरूतिभिः । श्रवन् ब्रह्माणावसागमन् ॥ २० ॥ विश्वेदेवाः । इत्यन्तः ।

विषयः । १ अध्याये, षट्गुह्यारणे सुतादिभेदकथनादि । २, अग्न्याधानकालनिरूपणादि । ३, पौर्णमास्यादीष्टिकथनं । ४, पिण्डपित्रयज्ञादिकथनं । ५, अग्नीषोमयागकथनादि । ६, मन्त्रराचादौ जप्यमन्त्रकथनं । ७, सवनीयेष्टिप्रभृतिकथनादि । ८, आदित्यग्रहेष्ट्यादिकथनञ्च । (अष्टमाध्यायारम्भावधिपञ्चपत्रात्मकः पाठोऽस्ति । ततः खण्डितम् ।)

No. 908. दैवतकाण्डः ।

Substance, country paper, 10½ × 4¼ inches. Folia, 92. Lines, 8—9 on a page. Extent, 1400 s'lokas. Character, Nágara. Date, Sm. 1664. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Daivata Kánḍa. The second part of Yáskás Nirukta, containing Chapters VII to XIII.

Beginning. अथातो दैवतं तत्यानि नामानि प्राधान्यस्तुतीनां तद्दैवमित्याचक्षते ।

End. मक्षते भूताय नमो याक्काय ब्रह्मशुक्लमसीय ब्रह्मशुक्लमसीय ॥ ७ ॥

Colophon. पञ्चमः पादः ।

विषयः । षट्दैवमन्त्रभेदनिर्णयः । (सप्तमाध्यायावधस्य प्रारम्भः अतः प्रारम्भखण्डितमिदं ।)

No. 909. सौभाग्यतन्त्रं ।

Substance, country paper, 9½ × 4 inches. Folia, 10. Lines, 10 on a page. Extent, 300 s'lokas. Character, Nágara, Date, Sm. 1850. Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhuchandra Mukhopádhyáya. Appearance, old; the leaves are worm-eaten. Verse. Incorrect.

Saubhágya Tantra. A Tántric compilation, containing directions for formal recitation (*Páráyaṇa*) of certain *víja mantras* under specified conditions. The word *páráyaṇa* is employed to indicate all formal readings, whether of víja mantras or of particular works, within stated times, or under specified restrictions. The practice is said to have originated since the time of Parikshit, the grandson of Arjuna, who heard the Mahábhárata recited in course of seven days. He was cursed by a Bráhman to be bitten by a serpent in seven days, and, knowing the curse to be infallible, he devoted those days to hearing the mighty deeds of his ancestors as described in the great epic. Portions of the Vedas, the Puráṇas, and the Rámáyaṇa, are now frequently made the subject of páráyaṇa. The time extends from three days to three months. The other conditions are fasting and abstinence of various kinds. In the case of víja mantras the number of times they are to be

repeated within a given time, and in particular postures are the principal conditions. Contents: 1, Time meet for repeating vija mantras. 2, General conditions for repeating mantras. 3, Sixteen primary conditions. 4, Different kinds of Páráyana. 5, Páráyana of the mantras sacred to the Vidyás (forms of Durgá). 6, Páráyana of the name of a god or goddess. 7, A form of Páráyana called *Tattva;* 8, Ditto called *Hańsa*: 9, Ditto called *chakra*. 10, Ditto called *Ramá*. 11, Ditto called *Ámnáya*.

Beginning. अस्य + कटसानन्दनिष्यन्दामृतविग्रहां ।
चिन्मात्ररूपिणीं विद्यां वन्दे खामन्दसुन्दरीं ॥
अथ वक्ष्ये विसरेण पारायणविधिं परं ।
यस्य विज्ञानमात्रेण साक्षात्परशिवो भवेत् ॥

End. एवं यः कुरुते भक्त्या पारायणक्रमाज्जपः ।
मानुषे वर्त्तमानोपि साक्षात्परशिवः परः ॥

Colophon. इति श्रीमत्सौभाग्यतन्त्रे पारायणविधौ आम्नायपारायणनिरूपणं नामैकादशः पटलः ।

विषयः । १ पटले, जपकालः । २, मन्त्रपारायणलक्षणं । ३, षोड़शाङ्गविधानोक्त-बीजतत्त्वकथनादि । ४, पारायणभेदाः । ५, विद्यामन्त्रपारायणकथनादि । ६, नामपारायणकथनं । ७, तत्त्वपारायणकथनादि । ८, हंसपारायणलक्षण-कथनादि । ९, चक्रपारायणलक्षणकथनादि । १०, रमापारायणलक्षणकथ-नादि ॥ ११, आम्नायपारायणलक्षणकथनादि ।

No. 910. रससङ्केतकलिका ।

Substance, country paper, $12\frac{3}{4} \times 6\frac{1}{2}$ inches. Folia, 14. Lines, 11 on a page. Extent, 357 slokas. Character, Nágara. Date. ? Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhuchandra Mukhopádhyáya. Appearance, old. Verse. Generally correct.

Rasasaṅketa-kalikā. A treatise on the preparation of metallic medicines. By Chámunda, a Káyastha of the Naigeya clan. The MS. is incomplete, some unknown portion of the end being wanting. Contents: 1, Mercury, its purification and oxidation; tests of perfect oxidation, virtues of its various oxides. 2. Oxidation of iron, gold, copper, &c. 3. Medicinal preparations with poisons. 4. Medicinal preparations with mercury.

Beginning. शिवं नत्वा रसाधीशं चण्डः कायस्थकुलभूः।
करोति रससङ्केतकलिकाभीष्टसिद्धिदाम्॥ अथ पारदोत्पत्तिः।

End. (खण्डितत्वात्परिशमाप्तिवाक्यादिकं नास्ति। ग्रन्थकर्त्तुर्नामद्वयं प्रारम्भवाक्योक्तं, चण्ड इति, "इति नैगमकायस्थचामुण्डछतायां रससङ्केतकलिकायां प्रथमोल्लासः, एतद्वाक्योक्तं" चामुण्ड इति। कुत्रचित् नैगमेतिविशेषणं न दृश्यते)।

विषयः। १ उल्लासे, पारदशोधनभस्मीकरणप्रकारः। पारदभस्मपरीक्षा। पारदभस्मगुणकीर्त्तनादि। २, लौहस्वर्णरौप्यताम्रादिधातुभस्मीकरणादिकथनं। ३, विषौषधकरणप्रकारादि। ४, रसौषधकरणप्रकारादि।

No. 911. मन्त्रचन्द्रिका।

Substance, country paper, $10\frac{3}{4} \times 4$ inches. Folia, 36. Lines, 11 on a page. Extent, 1100 slokas. Character, Nágara. Date, Sm. 1855. Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhuchandra Mukhopádhyáya. Appearance, decayed. Prose. Generally correct.

Mantra-chandriká. Vija-mantras of various gods and goddesses and the ritual appropriate for worshipping them. The work is divided into nine chapters (*prákas'as*), and embraces the names, besides those of the leading gods and goddesses, of the planets, and the demoniac attendants of Síva and Durgá.

Beginning. चारुनाभं त्रिनेत्रं शुभुजचरतरं वेदशस्त्रान्धानं
विभाणं मौलिदेशे शिमकरशकलं दानधाराकुलं।
ब्रह्मेन्द्राद्यैः समस्तैरमरपरिवृतैः सेवितं शुभदन्तं
भोगीन्द्राद्यं प्रसन्नं सकलशुभकरं तं भजेहं गजास्यं॥ १॥
आदौ गणपतेर्मन्त्राः शिवायास्तदनन्तरम्।
ततः कृष्णस्य सूर्यस्य ब्रह्मोद्योक्ता यथाक्रमम्॥ २॥
अथ क्रमेण गणेशादीन् स्मृत्वा तेषां मन्त्रा मन्त्रभेदाश्च लिख्यन्ते।

End. इति विन्यस्य। ओं अग्नये हृत्। अम्बकाय शिरः। ओं त्रिनेत्राय शिखा०। ओं वशिष्ठाय कवच०। ओं अग्निवीर्याय नेत्र०। ओं रुद्रदेवतायास्त्राय फट्। इति मन्त्रैः षडङ्गं विधाय।

Colophon. इति मन्त्रचन्द्रिकायां नवमः प्रकाशः। इति शिवप्रकरणं समाप्तम्।

विषयः । १ प्रकाशे, गणेश—वक्रतुण्ड—वीरगणेश—लक्ष्मीगणेश—शक्तिगणेश—हरिद्रागणेश—मन्त्रादिकथनं। २, वाग्वादिनी—हंसवागीश्वरी—बाला—भैरवी—कामेश्वरी—राजमातङ्गी—मन्त्रादिकथनं। ३, भुवनेश्वरी—दुर्गा—जयदुर्गा—लक्ष्मी—अन्नपूर्णा—मन्त्रादिकथनं। ४, अश्वारूढा—गौरी—ज्येष्ठलक्ष्मी—वह्निवासिनी—शिवदूती—चिकण्टकी—वगलामुखी—मन्त्रादिकथनं। ५, उग्रतारा—दक्षिणकालिका—धूमावती—भद्रकाली—महाकाली—उच्छिष्टचाण्डालिनी—धनदत्वक्षिणी—मन्त्रादिकथनं। ६, वासुदेव—लक्ष्मीवासुदेव—हरिहर—वामन—हयग्रीव—वराह—सुदर्शन—पुरुषोत्तम—मन्त्रादिकथनं। ७, हृषीकेश—श्रीधर—नरसिंह—राम—सीता—लक्ष्मण—हनुमन्—मन्त्रादिकथनं। ८, गोपाल—कामदेव—कार्त्तवीर्यार्जुन—सूर्य—चन्द्र—भौम—बुध—बृहस्पति—शुक्र—शनैश्चर—राहु—केतु—वह्नि—मन्त्रादिकथनं। ९, शिव—दक्षिणामूर्त्ति—मृत्युञ्जय—अघोर—नीलकण्ठ—क्षेत्रपाल—वटुक—त्र्यम्बक—मन्त्रादिकथनं।

No. 912. मयशिल्पं वा प्रतिष्ठातन्त्रं।

Substance, English paper, 8 × 6 inches. Folia, 98. Lines, 19—20 on a page. Extent, 1900 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Bábu Rájendralála Mitra. Appearance, new. Verse. Incorrect and corrupt.

Maya Mata, alias *Maya S'ilpa*, alias *Pratishṭhá Tantra*. A treatise on architecture founded on the canons of Maya, a Dánava, who is reputed to have built a palace for Yudhishṭhira. The work is written in the Tántric style in anushṭup verses; but it is so full of lacunæ, and obscure terms and phrases that it is in many places unintelligible. The author's name is not given; and the last line and the colophon suggest the idea of the work being incomplete. But such as it is it is the most complete treatise on architecture that has yet come to hand, and I feel grateful to Mr. A. C. Burnell for having procured it for me from the Library of the Rájá of Tanjore. It is remarkable in being less devoted to religious ceremonies and astrological disquisitions than the Mánasára. Contents; 1, Architecture defined. 2—3, Examination and purification of the ground intended to be built upon. 4, Measurement of land. 5, Ascertainment of the points of the compass. 6, Fixing of pegs to demarcate the spots for building. 7, Offerings to gods. 8, Measure of villages and the rules for

laying them out. 9, Ditto of towns. 10, Directions for laying out squares, octagons, &c. 11, Laying the foundation and the ceremonies to be observed on the occasion. 12, Plinth. 13, Base. 14, Pillars. 15, Stone-work. 16, Joining or cementation. 17, Spires or tops of houses. 18, One-storied houses. 19—20, Two-storied houses. 21, Three, four, &c.,-storied houses. 22, Gopuras or gates. 23, Mandapas. 24, Out-offices, barns, treasuries, &c. 25, *Mandapa sabhás*, or open courts. 26, Linear Measure—of finger-breadths, &c.

Beginning. प्रणम्य शिरसा देवं सर्वज्ञं जगदीश्वरं ।

तं दृष्ट्वा ज्ञातलं तुल्या शास्त्रि शास्त्रं यथाक्रमं ॥

तैतलानां मनुष्याणां वस्त्रादीनां सुखोदयम् ।

प्राज्ञो मुनिर्मयः कर्त्ता सर्वेषां वसुकर्मणां ॥

आदौ वास्तुप्रकारन्तु भूपरीक्षापरिग्रहम् ।

मानोपकरणं चैव शङ्कुस्थापनमार्गकं ॥

सुपदं सुरविन्यासं बलिकर्मविधिं तथा ।

ग्रामादीनाञ्च विन्यासं लक्षणं नगरादिषु ॥

भूलम्भस्य विधानं च गर्भविन्यासलक्षणं ।

उपपीठविधानं चाधिष्ठानानां च लक्षणं ॥

स्तम्भानां लक्षणं चैव प्रस्तरस्य च लक्षणं ।

सन्धिकर्मविधानं च शिखराणां तु लक्षणं ॥

एकभूमिविधानं च द्वितलस्य तु लक्षणं ।

त्रितलस्य विधानं च चतुर्भूम्यादिलक्षणं ॥

सशालं परिवाराणां गोपुराणां तु लक्षणं ।

मण्डपादिविधिं चैव शालानां चैव लक्षणं ॥

गृहविन्यासमार्गं च गृहवेशनमेव च ।

राजवेश्मविधानं च द्वारविन्यासलक्षणं ॥

यानानां शयनानां च लक्षणं लिङ्गलक्षणं ।

पीठस्य लक्षणं सम्यगनुकर्मविधिं तथा ॥

प्रतिमालक्षणं देवदेवीनां मानलक्षणं ।

चक्षुरुन्मीलनं चैव सङ्क्षिप्तादं यथाक्रमं ॥

अमर्त्याश्चैव मर्त्याश्च यत्र यत्र वसन्ति हि ।

तद्वतस्थिमतज्ञै(?)स्तद्वेदं च वदाम्यहं ॥

भूमिप्रासादजालं च शयनं च चतुर्विधं ।
भूरेव मुख्यवस्तुः स्यात्तच्च जातानि यानि हि ॥
प्रासादादीनि वस्तूनि वस्तुत्वाद्वस्तुसंश्रयात् ।
वस्तून्येव हि तान्येव प्रोक्तान्यस्मिन्पुरातनैः ॥
वर्णगन्धरसाकारा दिक्छब्दस्य शतैरपि ।
परोक्ष्येव यथायोग्यं गृहीतावधिनिश्चिता ॥
या सा भूमिरिति ख्याता वर्णानां च विशेषतः ।
द्विविधं तत्समुद्दिष्टं गौणमुख्यीत्यनुक्रमात् ॥
ग्रामादित्येव गौणादि भवत्यूर्वी मही मता ।
सभाशालाप्रपारङ्गमण्डपं मन्दिरं तथा ॥
प्रासाद इति विख्यातं + शिविका + कालयं ।
स्यन्दनं चैवमानीकं यानमित्युच्यते बुधैः ॥
पल्यङ्कं चण्डिकाकालपञ्जरं फलकासनं ।
पर्यङ्कं बालपर्यङ्कं शयनं चैवमादिकं ॥
चतुर्णामधिकाराणां भूरेवादौ प्रचक्ष्यते ।

End. चितालं किन्नराणां तु मर्त्यानां तु द्वितालकं ॥
अण्डजातं नवैकं स्यात् पिशाचानां तु विंशतिः ।
अङ्गुल्यः सम्यगाख्याताः प्रासादन्नलक्षणं शृणु ॥
इति सुप्रभेदे प्रतिष्ठातन्त्रे क्रियापादेऽङ्गुलिविधानपटलं एकोनविंशः ।

विषयः । १ अध्याये, वास्तुलक्षणं । २, ३, भूपरीक्षाभूमिशोधनादि । ४, भ्रमानप्रकारः । ५, दिक्साधनादि । ६, अङ्गद्वारा पीठादिस्थाननिर्देशः । ७, देवताबलिः । ८, ग्राममानतत्संस्थापनप्रकारः । ९, नगरमानतत्संस्थापनप्रकारः । १०, अष्टास्रचतुरस्रवृत्तभूमिकरणप्रकारादि । ११, भूमिमध्यस्थले चतुरस्रगर्तखननजलपूरणादिस्वरूपगर्भन्यासविधिकथनं । १२, उपपीठविधानं । १३, अधिष्ठानविधानं । १४, स्तम्भप्रमाणं, तन्निर्माणद्रव्यकथनं । १५, प्रस्तरकर्मकथनं । १६, सन्धिकर्मकथनं । १७, शिखरकरणादि । १८, एकभूमिगृहविधानं । १९, २०, द्वितलगृहविधानं । २१, चितलचतुस्तलादिविधानं । २२, गोपुरविधानं । २३, मण्डपविधानोपदेशः । २४, प्रासादशालादिविधानोपदेशः । धनधान्यागाराणां स्थानदिङ्निर्णयपरिमाणलक्षणादि च । २५, मण्डपसभाविधानादि । २६, अङ्गुलिमानादिप्रकारः । (अङ्गुल्यः सम्यगाख्याताः प्रासादन्नलक्षणं शृणु, इत्युक्तत्वादसम्पूर्णमिदमित्यनुमीयते ।)

No. 913. सभातरङ्गसारः ।

Substance, English paper, 11 × 5¾ inches. Folia, 37. Lines, 10—11 on a page. Extent, 310 s'lokas. Character, Nágara. Date, Sm.°1926. Sk, 1791. Place of deposit, Varáhanagara, 24-Parganás, Bábu S'ambhu-chandra Mukhopádhyáya. Appearance, new. Verse. Generally correct.

Sabhá-tarangasára. A poetical miscellany. By Jagannátha Mis'ra. Contents: 55 S'lokas in praise of greatness. 3 S. Do. grave men. 48 S. Condemnation of wicked men. 8 S. Praise of merit. 12 S. Do. liberal-mindedness. 22 S. The song of the chátaka. 11 S. The song of the Bhramora (large blackbee). 1 S. Do. silk-cotton-tree 4 S. Do. of the Parrot. 2, Do. the good tree. 8 S. Do. of the Kokila. 5 S. Do. of the crane. 5 S. Do. of the goose. 4 S. Do. of the crow. 9 S. Do. of the elephant. 8 S. Do. of the lion. 5 S. Do. of the deer. 5 S. Do. of the sandal tree. 2 S. Do. of musk. 1 S. Do. gum tree. 8 S. On trees. 7 S. Places unfit for habitation. 8 S. Song of the firefly. 9 S. Song of the moon. 1 S. Song of water. 7 S. Song of the clouds. 4 S. Do. of the lotus. 2 S. Do. of the mountain. 2 S. Disruption of friendship. 3 S. Condemnation of bad poets. 2 S. Do. of flatterers. 8 S. Desire. 2 S. Absence of pride. 2 S. Advantage of one's own place. 3 S. The kind of wife to be divorced. 2 S. Characteristics of a good woman. 4 S. Song of the River. 2 S. Pride condemned. 8 S. Praise of valorous men. 21 S. Advantage of wealth. 22 S. Miserliness condemned. 21 S. Evils of poverty. 6 S. Evils of begging.

Beginning. नत्वा शिवं प्रथमतः प्रणिपत्य चण्डीं वाग्देवतां तदनु तातपदं गुरुंच ।
यद्गुह्यते किमपि यत् सुजनास्तदत्र चेतो विधातु मुदिताः कृपया मयि स्युः ॥ १॥
जगन्नाथेन मिश्रेण सेनैव क्रियतेऽधुना ।
नाम्ना सभातरङ्गोयं सद्गुहः सत्सुखावहः ॥ २ ॥

End. याज्ञातं परिलीनमुग्रनखरैः चुर्णं स्वयं चर्वितं,
चिप्तं यद्वत नीरसत्वकुपितेनेति व्यथां मालथाः ।
हे माणिक्य तवैतदेव कुशलं यद्वानरेणाग्रहा-
दन्तःसत्त्वनिरूपणाय सहसा चूर्णीकृतो नाश्मना ॥ ९ ॥

Colophon. इति श्रीसभातरङ्गसारः ।

वीरविक्रमशकस्य वत्सरैः सम्मितैरसद्विनन्दकेवलैः । (१९२६)
शालिवाहनस्य तथैव धीमत एकनन्दगिरिकेवलैर्युते ॥ (१७९१)
दृषराशिरविगे सितपक्षे सर्पस्वामिनि तिथौ रविवारे ।
ख्यातकाशिपुरे सुरमणीये लेखितं शुभपुस्तकमेतत् ॥

विषयः । ५५ पद्यैर्मच्छक्तिविशेषाणां प्रशंसा । त्रिभिः पद्यैर्धीरजनप्रशंसा । ४८ पद्यैर्दुर्जननिन्दा । ८ पद्यैर्गुणप्रशंसा । १२ पद्यैरुदारव्यक्तिप्रशंसा । २२ चातकान्योक्तिः । ११ पद्यैर्धैरान्योक्तिः । १ पद्येन शालूकान्योक्तिः । ४ पद्यैः शुकान्योक्तिः । २ पद्याभ्यां सदृक्षान्योक्तिः । ८ पद्यैः कोकिलान्योक्तिः । ५ पद्यैर्वकान्योक्तिः । ५ पद्यैर्हंसान्योक्तिः । ४ पद्यैः काकान्योक्तिः । ९ पद्यैर्गजान्योक्तिः । ८ पद्यैः सिंहान्योक्तिः । ५ पद्यैर्भृंगान्योक्तिः । ५ पद्यैश्चन्दनान्योक्तिः । २ पद्याभ्यां कस्तूर्युक्तिः । १ पद्येन वायुक्तान्योक्तिः । ८ पद्यैः सामान्यदृक्षान्योक्तिः । ७ पद्यैः परित्याज्यदेशाद्युक्तिः । ८ पद्यैः खद्योतान्योक्तिः । ९ पद्यैश्चन्द्रान्योक्तिः । १ पद्येन जलान्योक्तिः । ७ पद्यैर्मेघान्योक्तिः । ४ पद्यैः कमलान्योक्तिः । २ पद्याभ्यां पर्वतान्योक्तिः । २ पद्याभ्यां मैत्रीभङ्गहेतुकथनं । ३ पद्यैः कुकविनिन्दा । २ पद्याभ्यां सुकविनिन्दा । ८ पद्यैस्तृष्णावर्णनं । २ पद्याभ्यां निरहङ्कारितावर्णनं । २ पद्याभ्यां स्थानप्रधानाधिकतावर्णनं । ३ पद्यैः परित्याज्यश्लीलत्वलक्षणनिरूपणं । २ पद्याभ्यामुत्तमश्लीलत्वलक्षणोक्तिः । ४ पद्यैर्नयन्योक्तिः । २ पद्याभ्यां गर्वपरिहारः । ८ पद्यैस्तेजस्विनां प्रतापवर्णनं । २१ पद्यैर्धनप्रशंसा । २२ पद्यैर्धनसञ्चयादिनिषेधः । २१ पद्यैर्दारिद्र्यनिन्दा । ६ पद्यैर्याचकनिन्दा ।

No. 914. षोड़शपिण्डदानप्रयोगः ।

Substance, country paper, 12½ × 3 inches. Folia, 4. Lines, 6 on a page. Extent, 45 s'lokas. Character, Bengali, Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Shoḍas'apiṇḍa-dána-prayoga. A treatise on the offering of sixteen funeral cakes to the manes at certain times. Anonymous.

Beginning. अथ षोड़शपिण्डदानप्रयोगः । तत्र संवत्सरप्रदीपे । अमावास्यान्तु(?)कन्यार्के तीर्थप्राप्तौ तथा नृपः । श्राद्धं कृत्वा विधानेन दद्यात् षोड़शपिण्डकमिति ।

End. मित्राणि सख्यः पशवश्च दृष्ट्वा दृष्टा च्छदृष्टाश्च कृतोपकाराः।
जन्मान्तरे ये ममसङ्गताश्च तेभ्यः स्वधापिण्डमहं ददामि ॥
ऋचोनविंशतिपिण्डे षोड़शपिण्डकं पारिभाषिकं पश्चात्सवत्।

Colophon. इति षोड़शपिण्डदानं।

विषयः।* अमावास्यायां कन्यार्के तीर्थे च कर्त्तव्यस्य षोड़शपिण्डदानस्य विधिः।

No. 915. जकारभेदः।

Substance, country yellow paper, 15 × 3¼ inches. Folia, 5. Lines, 6 on a page. Extent, 93 s'lokas. Character, Bengali. Date, Sk. 1661. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Jakárabheda. A vocabulary of words containing the letter জ, designed to point out what words have the letter জ and what the letter য having the sound of জ. By Purushottama.

Beginning. (प्रथमपत्राभावात् प्रारम्भवाक्यादिकं नास्ति।)

End. जयन्ती जानकी जय्यो जिज्ञासा जनको विजः।
पूजटीसुज+यैव तर्जन्यपि च वर्गजः॥

Colophon. इति पुरुषोत्तमकृते जकारभेदः समाप्तः।

विषयः। तालव्यमूर्द्धन्यदन्त्यसकारवतां मूर्द्धन्यणकारवतां वर्गीयजकारवतां च कतिपय शब्दानामत्र सङ्ग्रहः।

No. 916. पार्थिवलिङ्गपूजनविधिः।

Substance, country yellow paper, 11¾ × 4½ inches. Folia, 3. Lines, 8 on a page. Extent, 64 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Párthivalingapújanavidhi. An extract from one of the Tantras, containing directions for worshipping S'iva in the form of a Lingam made of earth. Anonymous.

Beginning. कथयस्व महाबाहो लोकानां प्रीतिवर्द्धिकाम्।
इदलिङ्गशिवस्यार्चा सूचिता न प्रकाशिता।

कथयस्वाधुना देव यदि स्नेहोस्ति मां प्रति।

End. सच्चस्पूजनादेवि लभते वाञ्छितं फलम्।

सच्चस्य पूजनादेवि शिवत्वं प्राप्नुयाद् ध्रुवं॥ समाप्तश्चेदम्।

विषयः। कृष्णयपार्थिवलिङ्गपूजनविधिकथनं।

No. 917. दुर्गोत्सवविवेकः।

Substance, country yellow paper, 15½ × 3 inches. Folia, 15. Lines, 6—7 on a page. Extent, 340 slokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Durgotsava-viveka. A treatise on the propriety of worshipping Durgá, in spring and autumn, or the great national rite of the Durga-pujá. By Súlapáṇi Bhaṭṭáchárya. The work forms a part of the author's great compendium of modern Hinduism, called the *Viveka.*

Beginning. नत्वेशानीपदाम्भोजं भक्तद्रुमरशोभितं।

दुर्गोत्सवविवेकस्तु क्रियते शूलपाणिना॥

End. विशेषतस्त्वत्र बोधनप्रक्रिया नास्ति।

बोधितायां बोधनासम्भवादिति प्राग् विदितम्।

होमादिकन्तु पूर्ववज्ज्ञेयमिति दिक्।

Colophon. इति महामहोपाध्यायश्रीशूलपाणिभट्टाचार्यविरचितो दुर्गोत्सवविवेकः समाप्तः।

विषयः। शरदि वसन्ते च देवीपूजा कथं कर्त्तव्येत्यादेर्विचारः।

No. 918. व्रतकालविवेकः।

Substance, country yellow paper, 15½ × 3 inches. Folia, 14. Lines, 6 on a page. Extent, 260 slokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Vratakála-viveka. Times meet for performing vratas or optional fasts. By Súlapáṇi Bhaṭṭáchárya.

Beginning. नानामुनिमतद्वैधजातसंशयशान्तनः।

व्रतकालविवेकोयं क्रियते शूलपाणिना॥

End. कालविशेषानियन्त्रितमित्येतद्सम्भवाच्च ।
प्रतिष्ठाविधानञ्च प्रतिष्ठाविवेकेऽनुसन्धेयम् ।

Colophon. इति साङ्डियानमहामहोपाध्यायश्रीशूलपाणिविरचितः व्रतकालविवेकः समाप्तः ।

विषयः । व्रतलक्षणकथनादि । व्रतानुष्ठानादिकथनं । व्रतानुष्ठाने विहितकालः । जन्माष्टमीव्रतनिर्णयः । श्रीरामनवमीव्रतनिर्णयः । एकादशीव्रतनिर्णयः । सावित्रीचतुर्दशीव्रतनिर्णयः । शिवरात्रिव्रतनिर्णयः । सङ्क्रान्तिव्रतनिर्णयः । व्रतप्रतिष्ठाकालनिर्णयश्च ।

No. 919. सङ्क्रान्तिनिर्णयः ।

Substance, country yellow paper, 15½ × 3 inches. Folia, 9. Lines, 6 on a page. Extent, 170 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, new, but soiled. Prose. Generally correct.

Saṅkrānti-nirṇaya. Rules for ascertaining the conjunctions of months, or the time when the sun passes from one sign of the zodiac to another, the characters of those conjunctions, what should be done at such times, and what avoided. Anonymous.

Beginning. अथ सङ्क्रान्तिव्यवस्थानिर्णयः । आदौ सङ्क्रां विनिर्णीय ततो राशिस्थनिर्णयम् ।
व्यवस्थानिर्णयं पश्चात् करिष्यामि न संशयः ॥

End. सङ्क्रान्त्यां पक्षयोरन्ते द्वादश्यां निशि सन्ध्ययोः ।
तुलसीं ये विचिन्वन्ति ते च्छिन्दन्ति हरेः शिरः ॥

Colophon. इति सङ्क्रान्तिनिर्णयः समाप्तः ।

विषयः । नन्दादिसप्तसङ्क्रान्तिनामकथनादि । मेषादिराशिस्थद्वादशसङ्क्रान्तिनिर्णयः । सङ्क्रान्तौ निषिद्धानिषिद्धकर्मकथनादि च ।

No. 920. शुद्धितत्त्वकारिका ।

Substance, country yellow paper, 15½ × 3 inches. Folia, 19. Lines, 6 on a page. Extent, 360 s'lokas. Character, Bengali. Date, Sk. 1767. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Generally correct.

S'uddhitattvakárikd. Memorial verses embodying the canons of Raghunandana's S'uddhitattva, or rules for the observance of mourning, and on personal impurities. By Harinárayana S'armá.

Beginning. सर्वेस्वरूपं श्रीरामं प्रणम्य भक्तवत्सलं ।
कारिकां शुद्धितत्त्वस्य विनतेति यथामति ॥

End. किन्तु एकादशादौ चेत् श्राद्धं क्रियते तदा प्रेतपदोल्लेखेन ।

Colophon. इति श्रीहरिनारायणशर्मणता शुद्धिकारिका समाप्ता ।

विषयः । जननमरणाशौचनिर्णयः ।

No. 921. अशौचमञ्जरी ।

Substance, country yellow paper, 12½ × 3¾ inches. Folia, 6. Lines, 5—6 on a page. Extent, 60 s'lokas. Character, Bengali. Date, Sk. 1770. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

As'auchamañjarí. Rules regarding mourning and the duties to be attended to during the first ten days after the death of a parent, kinsman, or other person for whom mourning has to be observed. Anonymous.

Beginning. प्रणम्य परमात्मानं नत्वा श्रुतिं त्रिलोचनं ।
अशौचनिर्णयं वक्ष्ये प्रेतकर्म दशाहिकं ॥

End. तैलौषधञ्जि(नं)चैव पक्वापक्वसमन्वये ।
पर्णेषु चैव सर्वेषु नाशौचं घृतसूतके ॥

Colophon. इत्यशौचमञ्जरी समाप्ता ।

विषयः । मरणाशौचनिर्णयः ।

No. 922. पदार्थकौमुदी ।

Substance, country yellow paper, 17 × 3¾ inches. Folia, 199. Lines, 8 on a page. Extent, 7920 s'lokas. Character, Bengali. Date, Sk. 1627. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Padárthakaumudí. A commentary on the Náma-liṅgánus'ás'ana of Amara Siñha. By Náráyana Chakravartí.

Beginning. हृदि स्थमपि दूरस्थं सर्वमादृत्य तिष्ठति ।
यन्महः परमं बीजं तदानन्दपदं नुमः ॥
रहः श्लिष्टता समं विविधकेलिमातन्वती
मुहुः स्मरमहोत्सवे शिवमुखाब्जचुम्बार्थिनी ।
दिगम्बरहृनाम्बरा + + + + + मौलेस्थित
ह्रिया नतमुखी सदा क्षितिधरेन्द्रकन्यावतु ॥
मङ्गलानन्दबीजानि भक्तानामतिसन्नतम् ।
गुरूणां चरणाब्जानि पुनः पुनरुपास्महे ॥
ज्ञात्वा शास्त्रमशेषमादिविदुषामालोक्य नानामतं
हेरम्बाङ्घ्रिस(रोज) युग्ममनलं नत्वातिभक्त्या सुधीः ।
श्रीनारायणपादपद्ममधुलिण्नारायणः श्रीनिधि-
र्यत्नेनामरपञ्जिकां वितनुते सङ्क्षेपतः सत्कविः ॥

End. इह ग्रन्थविस्तरभयान्नोक्तं तत् श्लिष्टानां पूर्वाचार्याणां च प्रयोगाज्ज्ञेयम् । यथा, स्त्री-पुंसयोः । विप्रचतुष्टयी, विप्रचतुष्टयः । गोधनानि पुंस्यपि नपुंसकेपि । पोटा स्त्री-त्याद्युदाहार्यमूह्यम् ।

Colophon. इति पदार्थकौमुद्याममरकोषटीकायां लिङ्गादिसङ्ग्रहवर्गार्थप्रकाशः । समाप्तोयं ग्रन्थः ।

विषयः । अमरकोषकाण्डत्रयार्थविवरणं ।

No. 923. वस्तुतत्त्वं ।

नवर्णनम्, (ख) श्यामावस्थाकथनम्, १०६ (क) नायिकावचनम्, (ख) नायकवचनम्, (ग) नायिकां प्रति मानम्, १०७ विरहिण्यवस्थावर्णनम्, १०८ नायिकान्तिके सखीवचनम्, १०९ वियोगिनीप्रलापाः, ११० नायकं प्रति दूतीप्रेषणम्, १११ वियोग्यवस्थावर्णन-प्रलापाख्याने, ११२ नायकस्याग्रे दूत्युक्तिः, ११३ नायिकां प्रति दूत्युक्तिः, ११४ दूती-नायिकासंवादः, ११५ भ्रूक्षारे परस्परविलोकनम्, ११६ प्रियानिष्यादिकम्, ११७ मानिनीमानवर्णनम्, ११८ कलहोक्त्यादिकथनम्, ११९ मिथुनस्योक्तयस्तथा, १२० प्रियस्य श्रित्वानुनयो, १२१ परस्परं प्रसादः, १२२ सूर्यास्ते चक्रदुःखम्, १२३ तमसो वर्णनम्, १२४ अभिसारीणां सञ्चारः, १२५ शशाङ्कोदयवर्णनम्, १२६ पानगोष्ठीकथनम्, १२७ (क) चाटुप्रभृतिवर्णनम्, (ख) सुरतप्रशंसा, १२८ नववधूक्रीड़ायां सखीवाक्यम्, १२९ सुरतकेलिकथनम्, १३० विपरीतरतिवर्णनम्, १३१ सुरतनिवृत्तिः, १३२ मध्यरात्रिक्रीड़ानायिकानुनयाः, १३३ प्रभातसमयोक्तयः, १३४ प्रभातवर्णनम्, १३५ (क) प्रभातानिलवर्णनम्, (ख) प्रभातोदयवर्णनम्, १३६ रात्रिसंयोगचेष्टायाः प्रातः प्रकटनम्, १३७ (क) मिश्रकशृङ्गारवर्णनम्, (ख) सतीवर्णनम्, (ग) कुलवधूवर्णनम्, १३८ असतीचरितम्, १३९ वसन्तादेर्वर्णनम्, १४० ग्रीष्मादेर्वर्णनम्, १४१ वर्षादेर्वर्णनम्, १४२ शरदादेर्वर्णनम्, १४३ हेमन्तादेर्वर्णनम्, १४४ शिशिरादेर्वर्णनम्, १४५ सम्भिश्राणाम्, १४६ जलकेलिः, १४७ प्रपोक्तिः, १४८ दोलाकेलिः, १४९ भ्रमरिकाक्रीड़ा, १५० कन्दुकक्रीड़नम्, १५१ नेत्रसम्मीलनम्, १५२ क्रीड़ा, १५३ सम्भिश्रोक्तयः, १५४ भयानकरसोक्तयः, १५५ बीभत्सरसोक्तयः, १५६ रौद्ररसोक्तयः, १५७ शान्तरसे—वैराग्यस्य प्रशंसनम्, १५८ अनित्यतावर्णनम्, १५९ विषयादिविड़म्बनवर्णनम्, १६० पश्चात्तापवर्णनम्, १६१ कालचरितवर्णनम्, १६२ विवेककथनम्, १६३ उपदेशः, १६४ कालसङ्ख्या, १६५ शरीरम्, १६६ चतुर्विधयोगे—योगत्रयनिरूपणम्, १६७ गोरक्षादिसाधितहठयोगवर्णनम्, १६८ मार्कण्डेयादिसाधितहठयोगप्रकरणम्, १६९ मनःस्थैर्यप्रभावः, १७० अष्टसिद्धिवर्णनम्, १७१ योगिचर्याकथनम्, १७२ अरिष्टजं ज्ञानम्, १७३ विदेहमुक्तिकथनमिति परिच्छेदाः। [अत्र तु पुस्तके वसन्तवर्णनस्य कियदंशं यावद् दृश्यन्ते, ततः सार्द्धचतुस्त्रिंशत्परिच्छेदानामभावः।]

No. 951. प्रायश्चित्ततत्त्वादर्शः ।

Substance, country yellow paper. Folia, 13. Lines, 8—10 on a page. Extent, 630 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikrampura, Dháká, Kálikrishna Gañgopádhyáya. Appearance, old. Prose. Correct.

Práyas'chittatattvádars'a. A commentary on Raghunandana's treatise on purification and expiations. By Vishnuráma Siddhántavágís'a, son of Jayadeva Vidyávágís'a, and grandson of Kavindra Bhattácháryya.

Beginning. प्रणम्य विष्णुरामेण परमात्मानमव्ययं ।
प्रायश्चित्तस्य यत्तत्त्वं तस्य व्याख्या वितन्यते ॥
(तद्व्याख्या परितन्यते वा) ॥
तत्र ग्रन्थारम्भेऽभिमतं देवं नमस्करोति प्रणमति ॥
तत्त्वतु विविधमुनिवाक्यार्थावलोकनपूर्वकपञ्चाङ्गाधिकरणाधीनव्यवस्थासङ्ग्रहः ॥
तत्र प्राधान्येन यद्वक्तव्यं तत् सङ्गलयन्नाह, प्रायश्चित्तस्येत्यादि ॥

End. प्रायश्चित्तान्तरन्तु प्रायश्चित्तविवेकादावनुसन्धेयमिति ॥

Colophon. इति . कविचन्द्रभट्टाचार्यात्मजजयदेवविद्यावागीशसुतश्रीविष्णुरामभिद्धान्तविरचितः प्रायश्चित्तादर्शः समाप्तः ।

विषयः । रघुनन्दनकृतप्रायश्चित्ततत्त्वव्याख्यानं ।

No. 952. श्राद्धतत्त्वादर्शः ।

Substance, country yellow paper. Folia, 10. Lines, 5—8 on a page. Extent, 370 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájnagara, Vikrampura, Dháká, Kálikrishna Gañgopádhyáya. Appearance, old. Prose. Correct.

S'ráddhatattvádars'a. A commentary on the S'ráddhatattva of Raghunandana. By Vishnuráma Siddhántavágís'a, the author named in the last preceding notice. The MS. is incomplete.

Beginning. प्रणम्य कमलाकान्तं विष्णुरामेण धीमता ।
व्याख्यानं श्राद्धतत्त्वस्य तन्यते विदुषां मुदे ॥

तचादौ ग्रन्थमारभमाणोभिमतदेवतां नमस्करोति, प्रणम्येत्यादि ॥

तत्त्वं विविधमुनिवाक्यादि ॥

End. एतदभिप्रेत्य पूर्वमृततिथिं विहायेत्युक्तं ॥ इत्यतः खण्डितः ॥

विषयः । श्राद्धतत्त्वव्याख्यानं ।

No. 953. सदाचारप्रकरणं ।

Substance, country yellow paper. Folia, 3. Lines, 6—7 on a page. Extent, 89 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Dháká, Kálikṛishṇa Gañgopádhyáya. Appearance, old. Verse. Correct.

Sadácháraprakaraṇa. A metrical treatise on the duties of ascetics. By S'aṅkara Áchárya. Hall's *Contributions*, p. 142.

Beginning. सच्चिदानन्दकन्दाय जगदङ्कुरहेतवे ।

सदोदिताय पूर्णाय नमोऽनन्ताय विष्णवे ॥ १ ॥

सर्ववेदान्तसिद्धान्तैर्ग्रथितं निर्म्मलं शिवं ।

सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥ २ ॥

End. सदाचारमिमं नित्यं योऽनुसन्दधते बुधः ।

संसारसागराच्छीघ्रं मुच्यते नात्र संशयः ॥ ५५ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्कराचार्य्यविरचितं सदाचारप्रकरणं समाप्तम् ।

विषयः । योगिसदाचारवर्णनं ।

No. 954. वेदान्तशास्त्रसङ्क्षिप्तप्रक्रियानिरूपणम् ।

Substance, country yellow paper. Folia, 9. Lines, 9—10 on a page. Extent, 427 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Dháká. Kálikṛishṇa Gañgopádhyáya. Appearance, old. Verse. Correct.

Vedánta s'ástra sankshipta-prakriyá-nirupaṇa alias *Prakriyá-nirúpaṇa.* A metrical epitome of the Vedánta doctrine. By S'aṅkara Áchárya.

Beginning. चित्सदानन्दरूपाय सर्वधीवृत्तिसाक्षिणे ।

नमो वेदान्तवेद्याय ब्रह्मणेऽनन्तरूपिणे ॥

यद्ज्ञानादिदं भाति यज्ज्ञानाद्विनिवर्त्तते ।
नमस्तस्मै चिदानन्दवपुषे परमात्मने ॥

End. यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यविरचितं वेदान्तशास्त्रसंङ्क्षिप्तप्रक्रिया-निरूपणं समाप्तम् ॥

विषयः । वेदान्तप्रक्रियाकथनं ।

No. 955. ब्रह्मोपनिषत्, अथर्ववेदीया ।

Substance, country yellow paper. Folia, 2. Lines, 6—7 on a page. Extent, 59 s'lokas. Character, Bengali. Date, ? Place, of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálikṛishṇa Gañgopádhyáya. Appearance, old. Prose and verse. Correct.

Brahma Upanishad. A description of Brahma. This is alleged to be an Upanishad of the Atharva Veda. It does not, however, correspond with the work of this name described under No. XXIII.

Beginning. अथास्य पुरुषस्य च चत्वारि स्थानानि भवन्ति, नाभिहृदयकण्ठमूर्द्धेति ।
तत्र चतुष्पाद् ब्रह्म विभाति, जागरितं स्वप्नं सुषुप्तं तुरीयमिति ॥

End. आत्मविद्यातपोमूलं तद् ब्रह्मोपनिषत् परं ।
सर्वात्मैकत्वरूपेण तद् ब्रह्मोपनिषत् परं,
तद् ब्रह्मोपनिषत् परमिति ॥ २ ॥

Colophon. इति अथर्ववेदीया ब्रह्मोपनिषत् समाप्ता ॥

विषयः । ब्रह्मनिरूपणं ।

No. 956. ब्रह्मज्ञानं ।

Substance, country yellow paper. Folium, 1. Lines, 12. Extent, 20 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálikṛishṇa Gañgopádhyáya. Appearance, old. Verse. Correct.

Brahmajñána. A poem on the essence of the Vedánta doctrine. By S'aṅkara Áchárya. The title of the poem is doubtful. I believe it is generally known by another name, but what that is I cannot now ascertain.

Beginning. नाहं कर्त्ता न कारयिता वा न कार्य्यं
नाहं भोक्ता न भोजयिता न च भोज्यं ।
नाहं दुःखं दुःखयिता वा न च दुःखी
सोऽहं प्रत्यक् चित्स्वरूपोऽहमात्मा ॥

End. का बुद्धिः काथवा चानिर्मम चात्मस्वरूपिणः ।
भजते भोगसेवाभिर्नकार्य्यायोपकल्पते ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यविरचितं ब्रह्मज्ञानं समाप्तम् ॥

विषयः । ब्रह्मज्ञाननिरूपणं ।

No. 957. अद्भुतोपनिषत् ।

Substance, country yellow paper. Folium, 1. Lines, 12. Extent, 24 slokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálikṛishna Gañgopádhyáya. Appearance, old. Prose and verse. Correct.

Adbhuta Upanishad. An Upanishad on the duties of ascetics, treating of various forms of Yoga penance. The MS. does not say to what Veda it is affiliated. Apparently it is apocryphal.

Beginning. यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगः ।

End. निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते, योगी कैवल्यमश्नुते ।
इति च एवं वेद इत्युपनिषत् ॥

Colophon. इत्यद्भुतोपनिषत् समाप्ता ॥

विषयः । योगप्रक्रियाकथनं ।

No. 958. मनीषापञ्चकं ।

Substance, country yellow paper. Folium, 1. Lines, 10. Extent, 6 s lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Ḍháká, Kálikṛishna Gañgopádhyáya. Appearance, old. Verse. Correct.

Manishápañchaka. A discussion between S'aṅkara Á'chárya and a Chaṇḍála, on caste distinctions and the Vedántic doctrine. The work is alleged in the text to have been composed by S'aṅkara himself.

Beginning. कदाचित् शङ्कराचार्य्यः काशीं प्रति पुरीं ययौ ।
तस्य ज्ञानपरीक्षार्थं कश्चिद् देवः समागतः ॥
चण्डालरूपिणं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् ।
यथोक्तवन्तमाचार्य्यं स देवः पुनरब्रवीत् ॥

End. यत्साक्षात्प्रुषिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तिकलने लब्धाम्बुधिर्निर्वृतः।
यस्मिन्नित्यसुखाम्बुधौ गणितधीर्ब्रह्मैव न ब्रह्मविद्
यः कश्चित् स सुरेन्द्रवन्दितपदोनूनं मनीषा मम ॥ ५ ॥

Colophon. इति श्रीशङ्कराचार्य्यकृतं मनीषापञ्चकं समाप्तं।

विषयः। ब्रह्मजातीयब्रह्मविद्याविषयकदेवचण्डालयोः कथोपकथनं।

No. 959. विवेकचूड़ामणिः।

Substance, country yellow paper. Folia, 31. Lines, 5—7 on a page. Extent, 868 slokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Dháká, Kálíkrisna Gañgopádhyáya. Appearance, old. Verse. Generally correct.

Viveka chúdámani. A poetical exposition of the Vedanta doctrine. By S'aṅkara A'chárya.

Beginning. सर्ववेदान्तसिद्धान्तगोचरं तमगोचरं।
गोविन्दं परमानन्दं सद्गुरुं प्रणतोस्म्यहम् ॥ १ ॥
जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता
तस्माद् वैदिककर्ममार्गपरता विद्वत्त्वमस्मात् परं।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थिति-
र्मुक्तिर्नो शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥ २ ॥

End. संसारध्वनितापभानुकिरणप्रोद्भूतदाह्यव्यथा-
खिन्नानां जलकाङ्क्षया मरुभुवि भ्रान्त्या परिधाम्यतां।
अत्यासन्नसुधाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-
न्येषा शाङ्करभारती विजयते निर्वाणसन्दायिनी ॥ ५८१ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्कर-भगवत्पादकृतो विवेकचूड़ामणिः समाप्तः ॥

विषयः। ब्रह्मज्ञानप्रशंसा।

No. 960. गुरुकाष्टकम्, सटीकं।

Substance, country yellow paper. Folia, 6. Lines, 6—10 on a page Extent, 330 slokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Dháká, Kálíkrishna Gañgopádhyáya. MSS. or this work are common enough: the codices in the Libraries of the Asiatic Society, and of the Sanskrit College, of Calcutta are generally correct Appearance, old. Prose and verse. Correct.

S'ukáshṭaka. A poem in eight stanzas in praise of the Vedánta philosophy. Attributed to S'uka Deva, son of Vyása. The text is explained in an elaborate commentary by Gangádharendra Sarasvatí.

Beginning. (मू०) भेदाभेदौ सपदि गणितौ पुण्यपापे विसीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तिः।
प्रव्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥ १ ॥

End. (मू०) सत्यं सत्यं परमममृतं सर्वकल्याणरूपं
माधारण्ये दहनमनिले शान्तिनिर्वाणदीपं।
तेजोरूपं निगमसदनं व्यासपुत्रोक्तं यः
प्रातःकाले पठति मनसा याति निर्वाणमार्गं ॥ ९ ॥

विषयः। ब्रह्मज्ञानप्रशंसा।

No. 961. शतरुद्रीयं, सभाष्यं।

Substance, country yellow paper. Folia 13. Line 10—11 on a page. Extent, 786 slokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikramapura, Dháká, Kálikrishna Gangopádhyáya. Appearance, old. Prose and verse. Correct.

S'atarudríya. The S'atarudríya hymn of the White Yajur Veda with the commentary of Sáyana A'chárya. The text is published in Dr. Weber's edition of the Veda, and a translation in Muir's Sanskrit Texts IV.

Beginning. (मू०) ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ १ ॥
या ते इषुः शिवतमा शिवं बभूव ते धनुः।
शिवाशयव्याय ते नम या नो रुद्र तनूस्॥ २ ॥

(भा०) यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥
इष्टकाचितयः सर्वाश्चतुर्धे हि समर्पिताः।
रुद्राध्याये पञ्चमे तु चित्याग्नेर्होम उच्यते ॥

End. (मू०) नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा(भा)स्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि। इत्येकादशोऽनुवाकः ॥

(भा०) हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि क्षापयामि।

Colophon. इति सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे यजुःसंहितायां चतुर्थकाण्डे पञ्चमप्रपाठके एकादशोऽनुवाकः समाप्तः ।

विषयः । रुद्रमहिमा ।

No. 962. श्रुतिस्तुतिव्याख्यानं ।

Substance, country yellow paper. Folia, 34. Lines, 4—6 on a page. Extent, 816 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikrampura, Dháká, Kálikṛishṇa Gañgopádhyáya. Appearance, old. Verse. Incorrect.

S'ruti-stuti-vyákhyána. A gloss, by Raghunátha Chakravartí, on S'aṅkara's commentary on the *S'ruti-stuti* or "praise of the S'ruti," of S'ridhara.

Beginning. बालानामुपकाराय श्रीधरीयश्रुतिस्तुतेः ।
व्याख्या व्याख्यायते कापि रघुनाथेन केन च ॥ १ ॥
सतामिति । सतो हेतुः सत इत्यादिना ।

End. इत्यशेषसमाम्नायेत्यत्रोपनिषद्भिन्नो वेदभागः समाम्नायः ।
श्यानन्दवनयेत्यादिग्रन्थान् दृष्ट्वा श्रुतिस्तुतौ ।
रघुनाथः लिखन् व्याख्यां श्रुतेः शङ्करभाषणं ॥ ४२ ॥

Colophon. इति श्रीरघुनाथचक्रवर्त्तिविरचितं श्रुतिस्तुतिव्याख्यानं समाप्तम् ।

विषयः । श्रीधरकृतायाः श्रुतिस्तुतेः शङ्कराचार्य्येण यत् भाष्यं कृतं तदनुगामिनी व्याख्येयं ।

No. 963. प्रायश्चित्तनिर्णयः ।

Substance, country yellow paper. Folia 30. Lines, 3—7 on a page. Extent, 1443 s'lokas. Character, Bengali. Date, Sk. 1698. Place of deposit, Dháká Vikrampura, Gañgácharaṇa Tarkaratna, Appearance, old. Prose. Correct.

Práyas'chitta nirṇaya. A summary of Raghunandana's digest of the laws relating to expiations. By Gopála Nyáyapañchánana. It is one of a series of digests prepared by the author under the title of Nirṇaya. The total number of these digests is not known, but five have been met with. (Nos. 963 to 967). The practice of writing such digests under one general name has been common among Indian jurists, the number of separate works under each name extending from three to twenty-seven. The following list comprises the names of some of those which are most frequently met with.

Common title.	*Author's name*
Ádars'a,	Áditya S'uri.
Ditto,	Jaydeva Paṇḍita.
Áloka,	Gopála Panchánana.
Chandriká,	Diváḳara.
Ditto,	Gautama.
Ditto,	Vedáṅga Ráya.
Chintámaṇi,	Váchaspati Mis'ra.
Ditto,	Gaṅges'vara.
Didhiti,	Ananta Deva.
Dípiká,	?
Kamalákara,	Kamalákara Mis'ra.
Kaumudí,	Govindánanda.
Kaustubha,	Anantadeva.
Mayukha,	Nílakaṇṭha.
Mimáñsá,	Nanda Paṇḍita,
Nirṇaya,	Nanda Paṇḍita.
Ditto,	Gopála Nyáyapañchánana.
Ditto,	Bhaṭṭojí Dikshita.
Párijáta,	Ananta Bhaṭṭa.
Pradípa,	Nágadeva.
Prakás'a,	Mitramis'ra Paṇḍita.
Rahasya,	Ramánátha.
Ratna,	Kamalákara.
Ratnákara,	Chandes'vara.
Ditto,	Gopinátha Bhaṭṭa.
Samuchchaya,	?
Sangraha,	Dalapatirája.
Sára,	Nágojí Bhaṭṭa.
Ditto,	Tryambaka.
Ditto,	Dalapatirája.
Sarvasva,	Haláyudha.
Saukhya,	Anonymous.
Sindhu,	Kás'ínátha Upádhyáya.
Tattva,	Raghunandana.
Vidhi,	Kamalákara.
Viveka,	S'úlapáṇi.
Vyavasthá-saṅkshepa,	Anonymous.

Beginning. नत्वा कृष्णपदद्वन्द्वं निर्णयो मुनिसम्मतः ।
प्रायश्चित्तकदम्बानां गोपालेन वितन्यते ॥
अथ प्रायश्चित्तनिर्णयः । तत्र हारीतः । प्रयतत्वादित्यादि ।

End. + + लक्षणप्रामाण्यापत्तिरिति सर्वं रमणीयमिति ।

Colophon. इति सद्वामद्देापाध्यायश्रीगोपालन्यायपञ्चाननभट्टाचार्य्यविरचितः प्रायश्चित्तनिर्णयः समाप्तः ।

विषयः । १ प्रायश्चित्तलक्षणं, २ बाह्यादिभेदे प्रायश्चित्तं, ३ विद्वद्विप्रक्षत्रादीनां मुण्डननिषेधः, ४ नवविधपापानि, ५ धेनुमूल्यनिर्णयः, ६ प्राजापत्यव्रतनिर्णयः, ७ ब्राह्मणस्वामिकसाक्षाद्ज्ञानकृतचतुर्हायन्यादिगोवधव्रतनिर्णयः, ८ क्षत्रियस्वामिकगोवधनिर्णयः, ९ प्रायश्चित्तपूर्वकृत्यं, १० वश्यसम्बन्धिगोवधव्रतनियमः, ११ शूद्रस्वामिकगोवधव्यवस्था, १२ उत्सर्गवाक्यकथनं, १३ गर्भिण्यादिवधप्रायश्चित्तं, १४ गवां निपातने गर्भनाशप्रायश्चित्तं, १५ यतिब्राह्मणादिवधप्रायश्चित्तं, १६ एकहायन्यादिवधप्रायश्चित्तं, १७ एकप्रयत्नकृतबहुगोवधप्रायश्चित्तं, १८ बहुकर्तृकैकगोवधप्रायश्चित्तं, १९ तत्र सङ्क्षेपः, २० वाचनिकदक्षिणानिर्णयः, २१ पञ्चविधबोधननिर्णयः, २२ बोधनादिनिमित्तकव्रतं, २३ अस्थिभङ्गादिप्रायश्चित्तं, २४ उत्पृष्टवृषभादिवधादिप्रायश्चित्तं, २५ अपालननिमित्तगोवधप्रायश्चित्तं, २६ अनुस्थाने विक्रयादिप्रायश्चित्तं ।

No. 964. तिथिनिर्णयः ।

Substance, country yellow paper. Folia, 21. Lines, 5—7 on a page. Extent, 877 slokas. Character, Bengali. Date, Sk. 1698. Place of deposit, Vikrampurá, Dháká Gañgácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Tithi-nirṇaya. A summary of Raghunandana's digest of the laws relating to the ages of the moon suitable for the performance of religious ceremonies. By Gopála Nyáyapañchánana.

Beginning. श्रीकृष्णचरणाम्भोजसङ्गेन सुचेतसा ।
क्रियते निर्णयस्तिथ्या गोपालेन सुधीमता ॥
अथ तिथिनिर्णयः । तिथेस्तु द्वादशभिर्भागैश्चन्द्रक्रियोपलक्षितः कालविशेषः ।
यथा अर्कात् विनिःसृतः प्राचीमित्यादि ।

End. (शेषोऽस्पष्टं, जीर्णत्वात् ।)

Colophon. इति महामहोपाध्यायश्रीगोपालन्यायपञ्चाननभट्टाचार्य्यविरचितस्तिथिनिर्णयः समाप्तः ।

विषयः । तिथितत्त्वकथनं ।

No. 965. विवादनिर्णयः ।

Substance, country yellow paper. Folia, 20. Lines, 3—6 on a page. Extent, 420 s'lokas. Character, Bengali. Date, Sk. 1698. Place of deposit, Vikrampura, Dháká, Gañgácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Viváda-nirṇaya. A summary of Raghunandá's digest of the laws relating to Jurisprudence. By Gopála Nyáyapañchánana.

Beginning. श्रीकृष्णचरणाम्भोजं ध्यात्वा गोपालशर्म्मणा ।
अष्टादश (शानां) तत्त्वानां निर्णयोऽत्र निगद्यते ॥
अथ विवादनिर्णयः । निर्णयस्तु सदुक्तिकः करणीयः ।

End. (ग्रन्थशेषे परिसमाप्तौ च विलुप्तं ।)

विषयः । १ व्यवहारलक्षणं, २ अष्टादशविवादपदानि, ३ ऋणदानं, ४ दासादिभ उद्धारादिनिषेधः, ५ ऋणादिदानप्रकारप्रभृतयः ।

No. 966. दायनिर्णयः ।

Substance, country yellow paper. Folia, 22. Lines, 6 on a page. Extent, 693 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vikramapura, Dháká, Gañgácharana Tarkaratna. Appearance, old. Prose. Correct.

Dáya-nirṇaya. A summary of Raghunandana's digest of the laws relating to inheritance. By Gopála Nyáyapañchánána.

Beginning. श्रीकृष्णचरणाम्भोजं ध्यात्वा गोपालशर्म्मणा ।
वितन्यते विवादेषु दायभागस्य निर्णयः ॥
अथ दायभागनिर्णयः । दायभागो यावत्स्वस्मिन्धनविभागः । मनुना । एष स्त्रीपुंसयो राज्ञा इत्यादि ।

End. शेषे पञ्चमेकं विलुप्तं ।

विषयः । दायभागव्यवस्था ।

No. 967. शुद्धिनिर्णयः ।

Substance, country yellow paper. Folia 7. Lines, 6 on a page. Extent, 220 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vikrampura Dháká, Gangácharana Tarkaratna, Appearance, old. Prose. Correct.

S'uddhi-nirṇaya. A summary of Raghunandana's digest of the laws relating to purifications. By Gopála Nyáyapanchánana.

Beginning. प्रथमपत्रं विलुप्तं ।

End. शेषपत्रमपि विलुप्तं ।

विषयः । मरणाशौचशुद्धिनिर्णयकथनादिः ।

No. 968. आचारनिर्णयः ।

Substance, country yellow paper. Folia, 19. Lines, 6 on a page. Extent, 598 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vates'vara, Vikramapura, Dháká, Gangácharana Tarkaratna. Appearance, old. Prose. Correct.

Áchára-nirṇaya. A short summary of the religious duties which a strict Hindu is bound to observe. By Gopála Nyáyapanchánana.

Beginning. आचारस्य श्रेयःसाधनत्वमाह ॥ हारीतः————(अस्यदं)

End. आपस्तम्बः————ति—(इत्यतः खण्डितः ।

विषयः । वर्णाश्रमाचारकथनादिः ।

No. 969. सङ्क्रान्तिनिर्णयः ।

Substance, country yellow paper. Folia, 5. Lines, 6 on a page. Extent, 157 s'lokas. Character, Bengali. Date, Sk. 1689. Place of deposit, Vates'vara, Vikramapura, Dháka, Gangácharana Tarkaratna. Appearance, old. Prose. Correct.

Saṅkránti-nirṇaya. A summary of the rules regarding the calculation of the passage of the sun from one sign of the zodiac to another. By Gopála Nyáyapanchánana.

Beginning. (प्रथमपत्रस्य प्रथमपङ्क्तिर्विलुप्ता ।)

End. अत्र विषुवस्य पुण्यविशेषजनकत्वात् मेषादाविति विषुवसङ्क्रान्तिपुण्यकालपरं ।
अन्यथा कालद्वयकल्पनापत्तेः ।

विषयः । सङ्ख्यान्तिगणना ।

No. 970. व्याप्तिग्रहोपायप्रभृतीनां भट्टाचार्यटीका ।

Substance, country yellow paper. Folia, 149. Lines, 5—9 on a page. Extent, 8381 s'lokas. Character, Bengali. Date, ? Place of Deposit, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Vyáptigrahopáyaṭíká. A gloss on that portion of Raghunátha's commentary on the Anumána-chintámaṇi of Gaṅges'a which refers to inherent presence. By Gadádhara Bhaṭṭáchárya. Vide ante I, p. 295.

Beginning. उपायाभावप्रयुक्तव्याप्तिनिश्चयाभावेनानुमानप्रामाण्यं न निर्वहतीति चार्वाक-पूर्वपक्षे भूयःसाध्यसाधनसहचारदर्शनं व्याप्तिग्राहकमिति जरन्नैयायिकसिद्धान्त इत्यादि ।

End. अथ तस्याः प्रत्यक्षलाभावे युक्त्यन्तरमेव वाऽनसन्धेयमिति ।

विषयः । व्याप्तिनिश्चयस्य उपायकथनं ।

No. 971. उपाधिवादटिप्पनी ।

Substance, country yellow paper. Folia, 21. Lines, 6—7 on a page. Extent, 716 s'lokas. Character, Bengali. Date ? Place of deposit, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Upádhiváda Ṭippaṇí. Jagadís'a Tarkálaṅkára's notes on the Upádhiváda chapter of Raghunátha S'iromaṇi's commentary on the Chintámaṇi of Gaṅges'a. Vide ante I p. 295.

Beginning. स्वीयहेतोर्वाच्यत्वस्येव परकीयहेतोः सोपाधिकत्वस्यापि ज्ञापने वादिनिग्रह-सम्भवाद्विजयत्वलक्षणैककार्य्यकारित्वसङ्कत्या व्याप्तिज्ञानविरोधज्ञानार्जकत्वरूप-प्रसङ्गसङ्कत्या व्याप्त्यन्तरमुपाधिं निरूपयितुमाह उपाधिज्ञानादिति ।

End. अत एवाह एवमिति पक्षेतरत्वविशिष्टसाध्यसामग्रीसत्त्वादिकमपि अप्रसिद्धानु-माने नोपाधित्वेन उद्भाव्यं कथकादिसम्प्रदायविरोधादिति भावः ।

Colophon. इति उपाधिवादटिप्पनी सम्पूर्णा ।

विषयः । परकीयव्याप्तिविघटकतया उद्भावनीयस्य उपाधेर्निरूपणम् ।

No. 972. प्रश्नोत्तरमाला ।

Substance, country yellow paper. Folia 2. Lines, 8 on a page. Extent 38 s'lokas. Character, Bengali. Date, Sk. 1762. Place of deposit, Vikramapura, Dháká, Gangácharana Tarkaratna. Appearance, old. Verse. Correct.

Prasnottaramálá. Vedantic catechism. By S'ankara Áchárya.

Beginning. अपारसंसारसमुद्रमध्ये सम्मज्जतो मे शरणं किमस्ति ।
गुरोः कृपालोः कृपया वदैतद् विश्वेशपादाम्बुजदीर्घनौका ॥ १ ॥
ब्रह्मो हि को वो विषयानुरक्तः का वा विमुक्तिः विषयाद् विरक्तिः ।
को वास्ति घोरो नरकः खदेहे तृष्णाक्षयः स्वर्गपदं किमस्ति ॥ २ ॥

End. कण्ठं गता वा श्रवणं गता वा प्रश्नोत्तराख्या मणिरत्नमाला ।
तनोतु मोदं विदुषां सुरम्या रमेशगौरीशकथेव सद्यः ॥ २२ ॥

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचिता प्रश्नोत्तरमाला समाप्ता ।

विषयः । प्रश्नोत्तरमुखेन वेदान्तसारवार्त्ताकथनं ।

No. 973. पाशकेरली ।

Substance, country yellow paper. Folia 8. Lines, 10 on a page. Extent, 220 s'lokas. Character Bengali. Date, Sm. 1905. Place of deposit, Vikramapura, Dháká, Gangácharana Tarkaratna. Appearance, old. Prose. Correct.

Pás'aka-kerali. Cleromancy or divination by the cast of the dice. By Garga Rishi.

Beginning. भगवति कृष्णाङ्गि मातङ्गिनि स्वकार्य्यप्रसाधिनि सर्वकार्य्यनिमित्तप्रकाशिनि
एह्येहि सत्वरं वद वद वरदे वरदे लेहि लेहि मातङ्गिनि सत्यं ब्रूहि स्वाहा
महादेवं नमस्कृत्य केरलज्ञानभास्करं ।
प्रवक्ष्ये सङ्गुणोद्दिष्टं ज्ञेयं येयं शुभाशुभम् ॥ १११ ॥
पदं पदं + वीणा + पतिता शोभनं तव ॥
शुभं वा दृश्यते तत्र सर्वारम्भेषु चिन्तितम् ।
सङ्ग्राम सर्वलाभश्च व्यवहारेण सम्पदः ॥

End. यः पुरासोज्जगद्गुरो गर्गो नाम महामुनिः ।
तेन स्वयं विनिर्णीता सत्या पाशकेरली ॥

Colophon. इति श्रीगर्गर्षिकृता पाशकेरली समाप्ता ।

विषयः । निश्चिप्तपाशकाङ्कानुसारेण प्रश्नशुभाशुभफलकथनं ।

No. 974. अनुमितिमानसवादार्थः ।

Substance, country yellow paper. Folia, 9. Lines, 5—8 on a page. Extent, 502 slokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vateśvara, Vikramapura, Dháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Anumiti-mánasa-vádártha. A treatise on Inference. By Gadádhara Bhattáchárya. This and the four following are parts of a series of sixty-four special treatises on the Nyáya which the author is reported to have written in addition to his larger works. Hall's Contributions, 41.

Beginning. लिङ्गपरामर्शानन्तरं विलक्षणानुमित्यात्मकप्रतीत्युदयात् तत्करणतया तस्य विलक्षणप्रमाणान्तरता तदेवानुमानमित्यभिधीयते ।

वह्निव्याप्यधूमवान् पर्वत इति परामर्शानन्तरं तदात्मकविशेषदर्शनमूलक-पर्वतो वह्निमानित्याकारकप्रत्यक्षनिर्णयादेव वह्न्यादिगोचरप्रवृत्त्युपपत्तेः, इत्यादि ।

End. अतोऽनुमानं न पृथक्करणमिति दिक् ।

Colophon. इति अनुमितिमानसस्य वादार्थः समाप्तः ।

विषयः । अनुमितेः प्रमाणान्तरताविरहविषयो विचारः ।

No. 975. नव्यमतवादार्थः ।

Substance, country yellow paper. Folia, 15. Lines, 8 on a page. Extent, 885 slokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vateśvara, Vikramapura, Dháká. Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Navya-mata-vádártha. A treatise on the new school of Nyáya with reference to Inference. By Gadádhara Bhaṭṭáchárya.

Beginning. अनुमितिं प्रति पर्वतीयधूमव्यापको वह्निरित्याकारकपरामर्श एव हेतुः । न तु वह्निव्याप्यधूमवान् पर्वत इत्याकारकः ।

End. ज्ञानसामान्यानुत्पादस्यानुभवविरुद्धत्वात् सामग्रीसम्बन्धकार्य्योत्पत्तेर्वा(?)कल्पनाभावात् क्षतिमत्त्वं ।

Colophon. इति नव्यमतस्य वादार्थः समाप्तः ।

विषयः । नव्यमतोपरि अनुमितिकारणताविषयो विचारः ।

No. 976. रत्नकोषवादार्थः ।

Substance, country yellow paper. Folia, 27. Lines, 7—8 on a page. Extent, 1290 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vates'vara, Vikramapura, Dhaká, Gangácharana Tarkáratna. Appearance, old. Prose. Correct.

Ratna-kosha-vádártha. On the knowledge of the invisible through Inference. By Gadádhara Bhattáchárya.

Beginning. परोक्षज्ञानं निश्चय एवेति सिद्धान्तः । रत्नकोषकारस्तु मतुप्रतिपक्षसम्बलन-दशायां संशयात्मिकामनुमितिं स्वीकरोति इत्यादि ।

Colophon. इति न किञ्चिदनुमितेः संशयत्वापत्तेरिति क्षत(मल्ल)मतिविस्तरेण इति ।

विषयः । परोक्षज्ञानस्य निश्चयरूपताप्रतिपादको विचारः ।

No 977. व्याप्त्यनुगमवादार्थः ।

Substance, country yellow paper. Folia, 5. Lines, 3—8 on a page. Extent, 270 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vates'vara, Vikramapura, Dhaká, Gangácharana Tarkaratna. Appearance, old. Prose. Correct.

Vyáptyanugama-vádártha. A treatise on the perception of the major term. By Gadádhara Bhattáchárya.

Beginning. अनुमितित्वावच्छिन्नं प्रति कोदृग् व्याप्तिविशिष्टपक्षधर्मताज्ञानं हेतुः, इत्यादि ।

End. न च भेदेन, वह्निमान् धूमादित्यादावव्याप्तेर्दुर्वारत्वादित्याशयो दीधितिकार-स्येति सङ्क्षेपः ।

Colophon. इति श्रीन्यायवागीशभट्टाचार्यविरचितो व्याप्त्यनुगमवादार्थः समाप्तः ।

विषयः । अनुमितिकारणीभूतज्ञानविषयीभूतायाव्याप्तेरनुगमप्रकारविषयो विचारः ।

No. 978. कारणतावादार्थः ।

Substance, country yellow paper. Folia, 22. Lines, 8 on a page. Extent, 1342 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vates'vara, Vikramapura, Dhaká, Gangácharana Tarkaratna. Appearance, old. Prose. Correct.

Káraṇatá-vádártha. A treatise on causation. By Gadádhara Bhaṭṭácharya.

Beginning. अथ निखिलेष्वपि वैदिकेषु लौकिकेषु च कर्म्मसु तत्तत्फलस्य कारणत्वं निश्चयवत्तत्सचभवन्तः प्रवर्त्तन्ते न तु तदनाकलयन्तः । तच्च किं नाम कारणत्वं, न तावत् फलाव्यवहितपूर्ववर्त्तित्वं, अतिप्रसङ्गात् इत्यादि ।

End. ननु संयोगजसंयोगं प्रति अवयवसंयोगस्य संयोगात्मावयवसंयोगात्मा (?)——— (इत्यतः खण्डितः ।)

विषयः । कारणताविषयो विचारः ।

No. 979. विरोधिविचारः ।

Substance, country yellow paper. Folia, 19. Lines, 7—8 on a page. Extent, 1014 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vates'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Virodhi-vichára. Fallacies or hindrances to logical sequence,—a Nyáya dissertation. By Rámachandra Nyáyavágís'a.

Beginning. स्वधर्म्मितावच्छेदकविशिष्टबुद्धेः समानधर्म्मितावच्छेदकप्रयाज्ञाभावनिश्चयो विरोधीति तदभावो हेतुः ।

End. अथ उक्तव्यापकसम्बन्धेन क्लृप्तहेतुतावक्लिलादिमत्ताभेदस्य सहकारितयैवोपपत्तेरिति दिक् ।

विषयः । प्रतिबध्यप्रतिबन्धकभावविषयो विचारः ।

No. 980. योग्यताविचारः ।

Substance, country yellow paper. Folia, 5. Lines, 8—9 on a page. Extent, 196 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vates'vara, Vikramapura, Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Generally correct.

Yogyatávichára. A Nyáya treatise on the relation of words to their meanings. By Rámachandra Nyáyavágís'a.

Beginning. अथ योग्यतानिर्णयदशायां शाब्दबोधानुदयाद् योग्यताज्ञानस्य शाब्दबोधहेतुता कल्प्यते, तच्च यत्संसर्गकयद्धर्म्मावच्छिन्नदत्त्वप्रभावप्रतियोगितानवच्छेदकत्वं यद्-

र्म्मनिष्ठं तद्धर्म्मावच्छिन्नविशेष्यकतत्संसर्गकतद्धर्म्मावच्छिन्नो वा बाध(?)स्तद्धर्म्मावच्छिन्नस्य योग्यता इति प्राञ्चः ।

End. इत्यपि नाविरलक्रमोत्पन्नानामुपस्थितीनामुपन्यस्थानासम्भवेन प्रत्यक्षासम्भवात् ।

Colophon. (परिसमाप्तिसूचकवाक्यं नास्ति ।)

विषयः । शाब्दबोधहेतुभूतयोग्यतानिर्वचनं ।

No. 981. विधिवादविचारः ।

Substance, country yellow paper. Folia, 22. Lines, 5—8 on a page. Extent, 1342 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vates'vara, Vikramapura, Dháká, Gangácharana Tarkaratana. Appearance, old. Prose. Generally correct.

Vidhi-váda-vichára. A Nyáya treatise on the nature of Sástric injunctions. By Rámachandra Nyáyavágís'a.

Beginning. ओदनकामः पचेत, स्वर्गकामो यजेत, इत्यादिविधिवाक्यं पाकयागादौ प्रवर्त्तकं तस्य च तथात्वं न साक्षात्, अव्युत्पन्नानां ततोऽप्रवृत्तेः । किन्त्वर्थज्ञानद्वारेति तस्य प्रवर्त्तकज्ञानजनकत्वोपपत्तये प्रवर्त्तकज्ञानविषये विधिलिङः शक्तिरिति सर्वेषामेवानुमतम् ।

End. अथ क्वचित् प्रतियोगिगोचरद्वेषेण सहकृतं स्वधर्म्मिककृतिसाध्यताज्ञानं स्वगोचरचिकीर्षाप्रवृत्तिहेतुः सप्रतियोगित्वञ्च अभावस्यापीति प्राञ्चः ।

Colophon. इति विधिवादविचारः समाप्तः ।

विषयः । स्वर्गकामो यजेतेत्यादिविधिवाक्यार्थविषयो विचारः ।

No. 982. अभिधावादविचारः ।

Substance, country yellow paper. Folia, 3. Lines, 9—10 on a page. Extent, 78 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vates'vara, Vikramapura, Dháká, Gangácharana Tarkaratna. Appearance, old. Prose. Incorrect.

Abhidhá-váda-vichára. A Nyáya treatise on deviation from general rules. By Rámachandra Nyáyavágís'a.

Beginning. लिङ्समवेताभिधाभिधं पदार्थान्तरं लिङर्थः प्रवर्त्तनालेन तज्ज्ञानस्यैव शब्दाधानप्रहत्तौ हेतुः। तथाहि प्रहत्तिसामान्येनेष्टसाधनताज्ञानस्य हेतुत्वसम्भवः।

End. उक्तशब्दबोधानन्तरञ्च स्वर्गकामनावत्त्वं प्रति विधिधर्म्म(?)यागे प्रवर्त्तयति इति प्रतिशब्दते (?) ततो यागे प्रवर्त्तत इति वदन्ति।

Colophon. इति अभिधावादविचारः समाप्तः।

विषयः। विधिलिङाद्यर्थाभिधाविषयो विचारः।

No. 983. आसत्तिरहस्यं।

Substance, country yellow paper. Folia, 12. Lines, 5—9 on a page. Extent, 911 slokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍhákā, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Incorrect.

Asatti-rahasya. On logical relations. By Rámachandra Nyáyavágís'a.

Beginning. गिरिर्भुङ्क्तमग्निमान् देवदत्तेन दृष्यमानसन्नगिरिरग्निमत्यदात्(?)गिर्य्यग्निमत्यदार्थेयेत्यादि।

End. प्रकारतादीनां तत्रानुगमे तादृशानुमित्यादीनां बाधात् प्रतिबध्यत्वप्रसङ्गो विशेष्यतया प्रकारताया एव तादृशप्रतिबध्यप्रतिबन्धकभावावच्छेदकत्वात् इति दिक्।

Colophon. इति आसत्तिरहस्यं समाप्तं।

विषयः। शाब्दबोधे कारणीयभूतायाः आपत्तेर्निरूपणम्।

No. 984. शब्दनित्यता।

Substance, country yellow paper. Folia, 3. Lines, 9 on a page. Extent, 189 s'lokas. Character, Bengali. Date, Sk. 1598. Place of deposit, Vaṭes'vara, Vikramapura, Ḍhákā, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Generally correct.

S'abda-nityatá. On the eternity of sound. By Rámachandra Nyáyavágís'a.

Beginning. वर्णात्मकः शब्दो नित्यो न वेतिविप्रतिपत्तिः। अत्र मीमांसाकारा वर्णात्मकशब्दानामुत्पत्तिविनाशकल्पने गौरवान्नित्यत्वमेव स्वीकुर्वन्ति इत्यादि।

End. न च प्रतिकृकारस्वकारादिसाधनभावलेनैकप्रतिबन्धकताकल्पने लाघवमिति सङ्क्षेपः ।

Colophon. समाप्तश्चायं शब्दनित्यताविचारः ।

विषयः । शब्दस्य नित्यताप्रतिपादनं ।

No. 985. पथ्यविधानं ।

Substance, country yellow paper. Folia, 6. Lines, 7 on a page. Extent, 89 s'lokas. Character, Bengali. Date, ? Place of deposit, Vates'vara, Vikramapura, Dháká, Gaṅgácharaṇa Tarkaratna. Appearance, old. Prose. Correct.

Pathyavidhána. On Dietetics, pointing out the evil effects likely to arise from certain articles of food, and their antidotes. Anonymous.

Beginning. यो रावणं रणमुखे भुवनैकभारं
हत्वा चकार जगतः परमोपकारं ।
यं ब्रह्म ऋभिदधिरे परतोऽपि पारं
तं नौमि मैथिलसुताहृदयैकनाथं ॥ १ ॥
नारीकेलफलेषु तण्डुलमथ क्षीरं रसाले हितं
जम्बीरोत्थरसो घृते समुचितः सर्पिस्तु मोचाफले ।
गोधूमेषु च कर्कटी हिततमा मांसाशने काङ्क्षिकं
नारङ्गे गुडभक्षणं प्रकथितं पिण्डालुकं कोद्रवे ॥ २ ॥

End. कोष्णाम्बु पित्तास्रभवे हि (इत्यतः खण्डितं) ।

विषयः । कस्मिन् द्रव्ये किं द्रव्यमुपकारकमित्याद्यत्र विचार्यते ।

No. 986. कृत्यकालविनिर्णयः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 30. Lines, 8 on a page. Extent, 1155 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Krityakálavinirṇaya. A disquisition on what times are most appropriate for the proformance of particular ceremonies, and a calendar of fasts and feasts. By S'rínátha S'armá, son of S'ríkara Áchárya.

Beginning. श्रीगोविन्दपदाम्भोजद्वन्द्वमद्वन्द्वसाधनम् ।
वन्दे इन्दारकघुनीमकरन्दमनोहरम् ॥
श्रीकराचार्यपुत्रेण श्रीमच्छीनाथशर्म्मणा ।
प्रीतये विदुषां चक्रे स्मृत्यकालविनिर्णयम् ॥
शौते विधौ कालकृतो विरोधः प्रायः सदैव प्रथितो बुधानाम् ।
यत्सदुच्छेदकृते मुनीनां विचार्य्य वाचो विदधाति तत्त्वम् ॥
नानाविदेशिविदुषां मतमाकलय्य चोदत्तमं यदभिलिख्य समर्पयामि ।
श्रद्धां बुधा विपथगड्डुलिकाप्रवाहे दूराद् विहाय कुरुताद्रमत्र गाढम् ॥
इह खलु नित्यनैमित्तिकादियावद्वैदिककर्म्माणि तत्तत्कालविशेषाङ्कानि
श्रूयन्ते ।

End. वैशाखमासस्य तु या तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे
नभस्यमासस्य तमिस्रपक्षे चयोदशी पञ्चदशी च माघे ।
एता युगाद्याः कथिताः पुराणैरनन्तपुण्यास्तिथयस्ततस्तः
पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतो मनुष्यः ॥
आद्यं कृतं तेन समाः सहस्रं रहस्यमेतत् पितरो वदन्ति ।
इति विष्णुपुराणीयवचने पञ्चदशीत्यत्र तमिस्रपदानुषङ्गान्माघमासीयामावस्या—
——(अतः परं खण्डितम्)

विषयः । कस्य कार्यस्य कः कालो मुख्यः को वा चमुख्यः, वत्सर-मासर्तु-तिथ्यादीनाञ्च कः स्वरूपः, इत्यादीनां विचारपूर्वकं स्मृत्यादिभ्यः प्रमाणमुद्धृत्य व्यवस्थापनम्, वैशाखादिषु कस्याञ्च तिथौ किं कर्त्तव्यमित्यादिनिरूपणञ्च । (अत्र प्रकरणच्छेदो नास्ति) ।

No. 987. अशौचसङ्क्षेपः ।

Substance, country yellow paper, 19 × 3 inches. Folia, 18. Lines, 7 on a page. Extent, 645 s'lokas. Character, Bengali. Date, Sk. 1732; Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

As'aucha-sankshepa. A summary of the laws relating to impure states of the person resulting from birth, death, and other causes. By Madhusúdana Váchaspati. The work is of considerable repute, but scarce. Contents:—Impurities resulting from menstruation; do. from miscarriage or abortion; do. from death of infants; do. among Súdras; do. from

death of wives; do. from the performance of Sati; do. from the conjunction of two or more mournings; do. from death under particular circumstances; do. from death of Sapindas; do. from death of persons in a foreign country. Impurity of the person defined. Impurity resulting from following the funeral procession of a stranger. Cremation of an image made of leaves in the case of a person whose corpse has not been burnt according to the rules of the S'ástra; person who should burn such a figure; the proper day for such a cremation; persons not entitled to perform this ceremonial. What should be avoided as causing impurity of the person. Impurity caused by contact; do. by hemorrhage. Especial impurities. Diet during mourning. The MS. contains several marginal notes.

Beginning. नत्वा सीतापतिं रामं कामदं करुणामयम्।
ब्रवीत्यशौचसङ्क्षेपं चट्टः श्रीमधुसूदनः॥
तत्रादौ रजस्वलाशौचम्। यथा शङ्खः।——
"शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः।
दैवे कर्मणि पैत्रे च पञ्चमेऽहनि शुद्धति"॥
भर्त्तुर्लौकिके कर्मणि व्यहात् परं शुद्धा, भर्त्तुरित्युपलक्षणम्। दैवे पैत्रे कर्मणि चतुर्थदिनात् परमित्यर्थः। अथ गर्भस्रावाशौचम्।

End. अन्यच्च शुद्धितत्त्वादौ अनुसन्धेयम्। ग्रन्थगौरवभिया न लिखितम्।

Colophon. इति महामहोपाध्यायश्रीयुतमधुसूदनवाचस्पतिविरचितोऽशौचसङ्क्षेपः समाप्तः।

विषयः। रजस्वलाशौचम्, गर्भस्रावाशौचम्, बालाशौचम्, शूद्रबालाशौचम्, स्त्र-शौचम्, सहमरणाशौचम्, अशौचसङ्करः, स्वत्युविशेषाशौचम्, सपिण्डा-शौचम्, विदेशस्थाशौचम्, अङ्गास्पृश्यत्वनिर्णयः, परानुगमनाशौचम्, पर्ण-नरदाहः, तत्कर्त्तृनिर्णयः, तद्दिननिर्णयः, क्रियानधिकारिणः, वर्ज्यावर्ज्यम्, स्पर्शाशौचम्, रक्तपाताशौचम्, अशौचविशेषः, अचारलवणञ्च।

No. 988. श्राद्धकल्पः।

Substance, country yellow paper, 19 × 3 inches. Folia, 23. Lines, 7 on a page. Extent, 1006 s'lokas. Character, Bengali. Date, Sk. 1734. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

S'ráddha-kalpa. A treatise on Sráddhas appropriate to followers of the Sáma Veda. By S'ridatta. Contents :—duties to be observed on the day preceding a s'ráddha ; do. on the day of the s'ráddha. Explanations of the technicalities of s'ráddha. Rules for the performance of funerals. General rules for performing a s'ráddha. Optional duties. General rules for performing an ashṭaka s'ráddha ; ritual for do. Special rules with reference to s'ráddhas performed on other than the fixed days. Things and acts forbidden or enjoined at s'ráddhas. Sráddha on the 11th day of the moon. S'ráddha on auspicious occasions, as marriage &c. Persons enjoined to perform s'ráddhas. The MS. has a large number of marginal notes by a different author.

Beginning. स्मृतिगद्यपुराणादिभूपगेपाखसम्मतम् ।
सतां वाक्यानि चालोक्य छन्दोगश्राद्धमुच्यते ॥
स्वः श्राद्धं करिष्यमाणो रजकद्वारा वासः चालयेत्, दन्तवल्कशिरोमलान्यपछत्य स्नाला निरामिषमेकवारं भुञ्जीत ।

End. असाध्वां पत्न्यां सत्यां सोदर्यादेरेवाधिकारः, पितृमातृसपिण्डाद्यभावे अपतितायास्तस्या अप्यधिकारः, इति सर्वं समञ्जसम् ॥

Colophon. इति महामहोपाध्यायश्रीश्रीदत्तविरचितः श्राद्धकल्पः समाप्तः ।

विषयः । सामवेदीनां श्राद्धव्यवस्थापकोऽयं ग्रन्थः । तथा हि तेषां—श्राद्धपूर्वदिनकृत्यम्, श्राद्धदिनकृत्यम्, श्राद्धीयसाधारणकृत्यनियमात्मिका परिभाषा, ब्राह्मणसत्कारादिप्रयोगः, सामान्यतः श्राद्धप्रयोगः, काम्यकृत्यानि । अष्टकादिश्राद्धानां सामान्यविधिः, तत्प्रयोगश्च । अपरपक्षतिथिनिमित्तककाम्यश्राद्धव्यवस्थादिः । श्राद्धेषु निषिद्धानि, विहितनिषिद्धानि च । एकादशाहैकोद्दिष्टप्रयोगः । नान्दीमुखादिश्राद्धप्रयोगः । अधिकारिनिर्णयश्च ।

No. 989. उड्डीशतन्त्रम् ।

Substance, country yellow paper, 13½ × 3 inches. Folia, 21. Lines, 7 on a page. Extent, 496 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Generally correct.

Uḍḍís'a Tantra. A Tantra of the Kaula class, treating of sorcery of different kinds. The subjects treated of are :—rites for bringing people

under subjection; do. making people of unsettled mind; do. benumbed; do. enamorated; do. for ensuring peace; do. for fattening; do. for destroying vision; do. for destroying the mind; do. audition; do. do. reason; do. for neglect of duty; do. producing pains; do. stoppage of an undertaking; do. for stopping the course of water; do. for bringing on blindness; do. do. mutilation; do. do. contractions of the body; do. do. dumbness; do. do. deafness; do. do. devilish fevers; do. for preventing evils of any kind; do. for destroying curds and honey; do. for making horses and elephants frantic; do. for inviting serpents to the domicile of an enemy; do. for inviting men to do; do. destroying corn crops; do. leaves of trees; do. for bringing on miscarriage, &c. &c. The work is divided into eleven chapters.

Beginning. * * देवाय नमः। उड्डीशेन समाकीर्णे * * छन्दसमाकुले।
प्रणम्य शिरसा देवी गौरी पृच्छति शङ्करम्॥

End. एकान्ते जप्तव्या श्रद्धायुक्तेन ध्यातव्या॥०॥

Colophon. इत्युड्डीशे हरमेखलायामेकादशः पटलः॥०॥ सम्पूर्णश्चायं ग्रन्थः।

विषयः। इहैकादशपटलाः सन्ति। तत्र १ पटले, वशीकरणम्। २, उच्चाटनम्। ३, स्तम्भनम्। ४, मोहनम्। ५, शान्तिकम्। ६, पौष्टिकम्। ७, चक्षुर्हानिः। ८, मनोहानिः। ९, श्रुतिहानिः। १०, ज्ञानहानिः। ११, क्रियाहानिः। १२, कीलकम्। १३, कार्यस्तम्भः। १४, जलस्तम्भः। १५, अन्धीकरणम्। १६, लूनीकरणम्। १७, गात्रसङ्कोचनम्। १८, मूकीकरणम्। १९, बधिरीकरणम्। २०, भूतज्वरकरणम् २१, शस्त्रशास्त्रकरणम्। २२, सर्वापद्विनाशनम्। २३, दधिमधुविनाशनम्। २४, मद्यकरणम्। २५, गजवाजिप्रकोपनम्। २६, भुजङ्गानामाकर्षणम्। २७, मानवानामाकर्षणम्। २८, शस्यविनाशनम्। २९, पर्णविनाशनम्। ३०, गर्भकरणम्। ३१, परशुप्रवेशनम्। ३२, निष्यन्दनम्—इत्यादीनाम् मन्त्राः, मन्त्रजपसङ्ख्यादयश्च, अनन्तरं कस्यां तिथौ कस्य कर्मणोऽनुष्ठानं कर्त्तव्यं किंवा कस्य मन्त्रस्य लेखन्यादिकमिति मन्त्रसिद्धिप्रकारः।

No. 990. शत्रुविमोचनं नाम वगलामुखीकवचम्।

Substance, country yellow paper, 14 × 5 inches. Folium, 1. Lines, 20 Extent, 28 slokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Written with red ink. Verse. Generally correct.

S'atruvimochana alias *Vagalámukhi-kavacha.* A hymn in praise of Vagalámukhí, esteemed as a charm for ridding oneself of his enemies. An extract from the Rudra-jámala Tantra.

Beginning. अथ वगलामुखीकवचम् । देव्युवाच ।

वगलाया महादेव्या या या विद्याः प्रकाशिताः ।

श्रुतास्त्वधिगताः सर्वाः श्रोतुमिच्छामि साम्प्रतम् ॥

End. देवीश्रीवगलापाठात् सर्वाः सिद्ध्यन्ति सिद्धयः ॥

Colophon. इति श्रीरुद्रयामले उमामहेश्वरसंवादे वगलामुखीशत्रुमोचनं नाम समाप्तम् ।

विषयः । वगलामुखीमन्त्रैरात्मरक्षा ।

No. 991. कामरत्नम् ।

Substance, country-made reddish yellow paper, 13 × 5 inches. Folia, 35. Lines, 12 on a page. Extent, 892 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Incorrect.

Káma-ratna. A treatise on sorcery and erotics, made up of extracts from the Tantras. The MS. is incomplete.

Beginning. यस्येश्वरस्य विमलं चरणारविन्दं संसेव्यते विबुधसिद्धमघघ्नतेन ।

निर्वाणसूचकगुणाष्टकवर्गपूर्णं (श्री)शङ्करं सकलदुःखहरं नमामि ॥

कामरत्नमिदं चित्रं नानातन्त्रार्णवान्मया ।

वश्यादिषट्त्रिंशीमन्त्रसाधनाङ्गं समुद्धृतम् ॥

End. एतन्मन्त्रद्वयेन वालुकाभिः सह श्वेतसर्षपान् सप्तवाराभिमन्त्र्य क्षेत्र—इत्यतः परं खण्डितम् । दशमप्रकरणावधि ।

विषयः । १ प्रथमोपदेशप्रकरणे—(क) वशीकरणादिकर्मणाम् ऋतुनिर्णयः, तिथिनिर्णयः, नक्षत्रनिर्णयः, अङ्गुलिनिर्णयः, साधारणप्रयोगश्च । (ख) वशीकरणप्रयोगः—तत्र सर्वजनवशीकरणम्, राजवशीकरणमित्यादि । २ द्वितीयोपदेशप्रकरणे—सर्वजनाकर्षणाद्याकर्षणप्रयोगाः । ३ तृतीयोपदेशप्रकरणे—युद्धजयादिद्यान्न-निवारणप्रयोगाः । ४ चतुर्थोपदेशप्रकरणे—शत्रुमुखस्तम्भनादिशुक्रस्तम्भनपर्य-न्तानां विविधस्तम्भनकार्याणां प्रयोगाः । ५ पञ्चमोपदेशप्रकरणे—सर्वजनमोह-नादि-केशरञ्जनान्त-मोहनप्रयोगाः । ६ षष्ठोपदेशप्रकरणे—वाजीकरणप्रयोगः ।

७ सप्तमोदेशप्रकरणे—गाढीकरण-स्त्री-द्रावण-लिङ्गस्थूलीकरण-दृढीकरण-स्तनवर्द्धनोत्थान-योनिसंस्कार-लिङ्गसंस्कार-लोमशातनादीनां प्रयोगाः। ८ अष्टमोपदेशप्रकरणे—खण्डीकरण-साम्य-भगबन्धन-भगमोचन-नष्टपुष्पापुष्पकरण-गर्भस्रावण-बङ्करक्तपातनिवारण-बन्ध्यागर्भधारण-मृतवत्साचिकित्सन-गर्भस्रावरुद्धण-मृष्कगर्भनिवारण-सुखप्रसव-पुष्परक्षण-दुर्भगाकरण-कलहकरणान्तानां प्रयोगाः। ९ नवमोपदेशे—सर्वारिष्टविनाशपूर्वकरक्षादिप्रयोगाः दशमादिप्रकरणास्तित्वञ्च सम्भाव्यते परमस्य पुस्तकस्य खण्डितत्वान्नोपलभ्यते तत एव तदीयविषयास्वेदानीमज्ञेयाः।

No. 992. यज्ञसूत्रप्रमाणम्।

Substance, country paper, 12 × 3 inches. Folium, 1. Lines 20. Extent, 34 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Incorrect.

Yajñasútra-pramána. Rules regarding the length and number of cords to be used in making sacrificial cords for the three twice-born classes. An extract from the Mátriká bheda Tantra.

Beginning. श्रीचण्डिकोवाच। यज्ञसूत्रधारणेन भूपूज्यो नाच संशयः।
दृदानीं यज्ञसूत्रस्य विधानमपि कथ्यताम्॥ श्रीशङ्कर उवाच।

End. एतत् सङ्केतमज्ञात्वा यः कुर्यात् सूत्रधारणम्।
स चण्डालसमो देवि यदि व्याससमो भवेत्॥

Colophon. इति मात्रकाभेदतन्त्रे एकादशः पटलः।

विषयः। मात्रकाभेदतन्त्रस्यैकादशतमपटलात्मकमिदम्। अत्र हि कियत्परिमितदीर्घं यज्ञोपवीतं धार्य्यं, इत्यादेरेव विधिः।

No. 993. दुर्गानामफलम्।

Substance, country made yellow paper, 14 × 3½ inches. Folia, 2. Lines, 7 on a page. Extent, 50 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Durgánáma-phala. Merit of reciting the name of *Durgá* a great number of times.

Beginning. अथ दुर्गानामफलम्। तवर्गस्य तृतीयो वर्णः पञ्चमस्वरसंयुतः।
कवर्गस्य तृतीयो यो रेफसस्योपरि प्रिये।
द्वितीयस्वरसंयुक्तं नामेदं परिकीर्त्तितम्॥

End. भवानीसन्निधौ यस्तु वाराणस्यां जपं चरेत्।
दरिद्रोऽपि धनी भूत्वा शिवलोके महीयते॥

Colophon. इति दुर्गानाममाहात्म्यं समाप्तम्।

विषयः। दुर्गेतिनामोच्चारणमाहात्म्यवर्णनम्।

No. 994. स्वरूपाख्यस्तोत्रम्।

Substance, country paper, 11 × 3½ inches. Folia, 7. Lines, 36 on a page. Extent, 63 slokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Correct.

Svarúpákhya-stotra. A hymn in praise of Durgá used as a charm. An extract from the Phetkárí Tantra.

Beginning. श्रीकण्ठामरकेशवर्णघटितं चन्द्रार्द्धचूड़ोज्वलम्,
बीजं यत्परमं गुणत्रयमयं कामप्रदं कर्मदम्।
मातः शङ्करवल्लभे प्रतिदिनं ध्यायन्ति ये ये सदा,
ते ते यान्ति चिदात्मकं हरिहरब्रह्मादिसाम्यं मुदा॥ १॥

End. इदं स्तोत्रं मातः सुपठति दिवारात्रिमनिशम्,
स सर्व्वज्ञो योगीश्वरनिकरसन्नर्कमनलम्।
जड़ोऽपि त्वद्रूपं जननि यदि सञ्चिन्त्य मनसा,
त्वदग्रे भूयोभिः क्षितिपतिसमानः क्षितितले॥ २४॥

Colophon. इति फेत्कारिणीये आगमसारे महातन्त्रे तारखण्डे महाकालविरचितं स्वरूपाख्यस्तोत्रं समाप्तम्॥

विषयः। मायाबीजोद्धारपुरःसरपूजादिकथनसहिता भगवत्याः स्तुतिः।

No. 995. बद्धयोनिमहामुद्राकथनम् ।

Substance, English (foolscap) paper, 14 × 4 inches. Folia, 5. Lines, 8 on a page. Extent, 150 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, fresh. Verse. Generally correct.

Baddhayoni-mahámudrá-kathana. An extract from the Toḍala Tantra, giving the ritual for performing a disgustingly obscene religious ceremony.

Beginning. श्रीदेव्युवाच । देवदेव महादेव संसारार्णवतारक ।
बद्धयोनिं महामुद्रां कथयस्व महानिधे ॥

End. इत्येतत् कथितं देवि ! किमन्यच्छ्रोतुमिच्छसि ॥

Colophon. इति तोड़लतन्त्रे पार्वतीश्वरसंवादे चतुर्थोल्लासः ।

विषयः । तोड़लतन्त्रस्य तृतीय-चतुर्थपटलात्मकोऽयम् । तत्र प्रथमे तारापूजनोपयोगिन्याः बद्धयोनिनामकमुद्रायाः स्वगुदच्छिद्रे खलिङ्गप्रवेशनरूपायाः स्वरूपोपदेशः, मन्त्रादिः, तज्जपादिप्रकारश्च । ततस्तारापूजनपद्धतिः ।

No. 996. श्मशानकालीमन्त्रः ।

Substance, foolscap paper, 14 × 4 inches. Folia, 4. Lines, 7 on a page. Extent, 119 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, fresh. Notes on the margin. Prose and verse. Correct.

S'mas'ánakálí-mantra. A manual for the worship of the goddess Kálí on a burning-ground at night.

Beginning. अथ श्मशानकालीमन्त्रः । तदुक्तं कालीतन्त्रे ।
वाणीं मायां तथा लक्ष्मीं कामबीजमतः परम् ।
कालिके सम्पुटेन चतुष्कं बीजमालिखेत् ॥

